अब अक्षता चढाउने—

अक्षतान् धवलान् विद्वन् गृहाण वरदोभव।

सवानत्युत्तमान् त्वंहि चाक्षयं कुरुमे फलम् ॥

अक्षतान् समर्पयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ॥

अब सिन्दूर चढाउने–

सिन्दूर ताटङ्क युगान्वितञ्च सुकण्ड सूत्रेण हरिद्रयाच।
युतं गृहाण बधू कुं कु मैतत् सौभाग्य हेतुं ननु मङ्गलं यत् ॥

सिन्दूरं समर्पयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ॥

अब फूल चढाउने–

पद्मादीनि सुगन्धीनि मालत्या दीनिबै मुने।
मया ह्वतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥

पुष्पाणि समर्पयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ॥

पोटलिकालाई पूजा गर्ने–

पहेलो या कुनै रङ्गीविरङ्गी कपडाको टुक्रामा यव, दूर्वा, सर्सप, कुंकुम, गोरोचन, गोकुलधुप, निम्कोपात गोखुर हाली बुटी जस्तो बनाई अष्ट चिरञ्जीवि पूजा गरेको थालिमै राखि वा अन्य पात्रमा राखी फूल अक्षता लिई त्यसैमा छोएर भन्ने–

भो गणेश इह आगच्छ इहतिष्ठ मम पूजां गृहाण यावत्पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो वरदो भव ॥ अनि–पाद्यम्, अर्घ्यम्, आचमनीयम्, पञ्चामृतं, शुद्धोदक स्नानम् , इदं लेपनं चन्दनम्, इमानि पुष्पाणि समर्पयामि गणेशाय नमः ॥

पुनः फूल अक्षता लिई उक्त पोटलिका मै छुने–

भो भाष्कर इह आगच्छ इहतिष्ठ मम पूजां गृहाण यावत्पूजां करोमि तावत्त्वं सुस्थिरोभव सुप्रसन्नो वरदोभव॥ पाद्यम्, अर्घ्यम्, आचमनीयम्, पञ्चामृतम्, शुद्धोदक स्नानम्, इदं लेपनं चन्दनम्, इमानि पुष्पाणि समर्पयामि भाष्कराय नमः॥

फेरि फूल अक्षता लिई षष्टिकालाई बीच कोठामा आवाहन गर्ने–

भो षष्टिके इहागच्छ इह तिष्ठ मम पूजां गृहाण यावत् पूजां करोमि तावत्त्वम् सुस्थिराभव सुप्रसन्ना वरदाभव॥ पाद्यम्, अर्घ्यम्, आचमनीयं, पञ्चामृतम्, शुद्धोदक स्नानम्, इदं लेपनं चन्दनम्, सिन्दूरम्, तिलान्, यवान्, अक्षतान्, इमानि पुष्पाणि समर्पयामि षष्टिकायै नमः॥

पुष्पाञ्जलि लिने–

जयदेवि जगन्मातर्जगदानन्द कारिणि॥
प्रसीदमम कल्याणि नमोऽस्तु षष्टिदेवते॥
रूपंदेहि जयं देहि भद्रं भवति देहिमे।
पुत्रान् देहि धनं देहि भाग्यं भवति देहि मे॥
पुष्पाञ्जलिं समर्पयामि षष्टिकायै नमः॥

अब षष्टिकालाई बलि दिने यौटा बोहोतामा दहि च्युरा समेत राखि बलि सङ्कल्प लिने भन्ने-

मम आयुरारोग्यै श्वर्योदय बृध्यर्थं षष्टिकायै मात्रे दधिसिपिटान्न बलिं तुभ्यं नमः ॥ षष्टिकायै नमः ॥

प्रार्थना—

ॐ आद्यं भूतासि भूतानां ब्रह्मणा निर्मिता पुरा ।

तस्मान्मा पुत्रवत्कृत्वापालय त्वं नमोस्तु ते ॥

भनी प्रार्थना गर्ने ॥

अब उक्त थालीमा नै पूजा गर्ने—

ॐ तृष्णायै नमः ॥ ॐ बृद्धमात्रे नमः ॥

ॐ गौर्यै नमः ॥ ॐ कठपूतनायै नमः ॥

भनी पूजा गर्ने ॥

फूल अक्षता लिई प्रार्थना—

ॐ त्रिषणा बृद्धमाता च गौरी च कठपूतना ॥

आयुर्दान्यो भवेन्त्वेता अद्य जन्म दिनेमम ॥

भनी चढाई दिने ॥

पुनः त्यहि थालीमा दक्षिण तर्फ आवाहन गरी पूजा गर्ने–

ॐ द्रप्स्यञ्चस्कन्द पृथिवीमनुद्या मिमञ्चयोनि मनुयश्चपूर्वः । समानँय्यो निमनुसञ्चरन्तन्द्रप्सञ्जु होम्यनुसप्तहोत्राः ॥

कार्तिकेय महावाहो गौरी ह्रदय नन्दन ॥

स्कन्दमां रक्ष सर्वत्र ऐहिदेव नमोऽस्तु ते ॥

ॐ कार्तिकेय इहागच्छ इह तिष्ठ मम पूजां गृहाण यावत्पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो वरदो भव ॥ ॐ पाद्यम्, अर्घ्यम्, आचमनीयम्, पञ्चामृतम्, शुद्धोदक स्नानम्, इदं लेपनं चन्दनम्, तिलान्, यवान्, अक्षतान्, इमानि पुष्पाणि समर्पयामि ॐ कार्तिकेयायनमः ॥१॥ यस्तै गरी ॐ जन्मदेवाय नमः ॥२॥ ॐ क्षेत्रपालाय नमः ॥३॥ ॐ पृथिव्यै नमः ॥४॥ ॐ अद्भ्यो नमः ॥५॥ ॐ तेजसे नमः ॥६॥ ॐ वायव्ये नमः ॥७॥ ॐ आकाशाय नमः ॥८॥ ॐ नारायणाय नमः ॥९॥ ॐ प्रजापतये नमः ॥१०॥ ॐ स्थान देवतायै नमः ॥११॥ ॐ प्रत्यक्ष देवतायै नमः ॥ भनी पूजा गर्ने ॥

अब चन्दन फूल अक्षता लिई नमःभने पिच्छे चढाउने –

ॐ कालाय नमः ॥ ॐ सम्बत्सराय नमः ॥

ॐ जन्म ऋतुभ्यो नमः ॥ ॐ जन्मतिथये नमः ॥

ॐ जन्मनक्षत्रेभ्यो नमः॥ ॐ जन्मवाराय नमः ॥

ॐ जन्मराशये नमः ॥ ॐ जन्मलग्नाय नमः ॥

ॐ जन्मवेलायै नमः ॥ ॐ जन्ममुहूर्ताय नमः ॥

ॐ जन्मयोगेभ्यो नमः ॥ ॐ जन्मकरणेभ्यो नमः ॥

ॐ सर्वेभ्यो देवेभ्यो नमः ॥

अब धूप अर्पण गर्ने–

वनस्पति रसोदिव्यो गन्धाढ्यो गन्धउत्तमः ॥
आघ्रेय सर्व देवानां धूपोयं प्रतिगृह्यताम् ॥

धूपम् आघ्रापयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ॥

अब बत्ति देखाउने–

आज्यञ्च वर्ति संयुक्त वह्निना योजितं मया ।
दीपं गृह्णन्तु ऋषयस्त्रै लोक्य तिमिरा पहम् ॥

दीपं दर्शयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ॥

अब नैवेद्य समर्पण गर्ने–

अन्नं चतुर्विधं स्वादु रसैःषड्भिः समन्वितम् ।
भूतानां जीवनं चैव नैवेद्यं प्रतिगृह्यताम् ॥

नैवेद्यं समर्पयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ॥

पुनराचमनीयम् (पिउने जल) चढाउने–

उच्छिष्टोप्य शुचिर्वापि यस्यस्मरण मात्रतः ।
शुद्धि माप्नोति तस्मैते पुनराचमनीयकम् ॥

पुनराचमनीयम् समर्पयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ॥

फलादि नैवेद्य चढाउने–

इदं फलं मुनिश्रेष्ट स्थापितं पुरतस्तव ।
तेनमे सफलावाप्ति र्भवेत्जन्मनिजन्मनि ॥

फलादीनि नैवेद्यानि समर्पयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ॥

पान मसला चढाउने–

महादिव्यंपूगिफलं नागवल्लि दलैर्युतम् ।
लवङ्गादिसमायुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

ताम्बूलम् समर्पयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ॥

सिंगो नरिवल वा फल चढाउने–

इदं फलं मया विद्वन् स्थापितं पुरतस्तव ।
तेनमे सफला वाप्ति र्भवेत् जन्मनि जन्मनि ॥

नारिकेलम् अथवा फलं समर्पयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ॥

भेटी चढाउने–

हिरण्य गर्भ गर्भस्थं हेम बीजं विभावसोः ।
अनन्त पुण्य फलद मतःशान्तिं प्रयच्छमे ॥

दक्षिणाद्रव्यं समर्पयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ॥

जलले प्रदक्षिणा (घुमाउने) गर्ने–

यानि कानि च पापानि जन्मान्तर कृतानि च ।
तानि सर्वाणि नस्यन्तु प्रदक्षिण पदे पदे ॥

प्रदक्षिणां समर्पयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ।

अब नीराजन कर्पूरादिले गर्ने–

चन्द्रा दित्यौ च धरणी विद्युदग्नि स्तथैवच ॥
त्वमेव सर्व तेजांसि ते न नीराजयाम्यहम् ॥

नीराजनं दर्शयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ॥

फूल अक्षता लिई पुष्पाञ्जलि लिने—

सर्वशास्त्रार्थ तत्वज्ञं वेदवेदाङ्ग पारगम् ॥
शास्त्रमूल प्रवक्तारं परासर सुतं भजे ॥१॥
कार्त्तवीर्यस्यहन्तारं परशुहस्तं महावलम् ॥
एकविंशति निः क्षत्रं कुर्वन्तं त्वां नमाम्यहम् ॥२॥
ब्राह्मणाय नमस्तुभ्यं द्रोणाचार्य सुतायवै ॥
वेदवेदाङ्ग पूर्णाय अश्वस्थाम्ने नमोनमः ॥३॥
राजर्षभ नमस्तुभ्यं भारद्वाज कुलोदभव ।
कृपाचार्य सदातुष्ट धीर वीर पराक्रम ॥४॥
भूमिंस्वर्गञ्चपातालं येनदत्तं द्विजन्मने ॥
भवितायोमरावत्यां महेन्द्रस्ते नमोवले ॥५॥
कश्यपस्य कुलोद्भूतं रक्तवर्णंद्विबाहुकम् ॥
दैत्यसेना परिवृत्तं दितिपौत्रञ्च वैष्णवम् ॥६॥
अञ्जनी गर्भसंभूतं जानकी शोक नाशनम् ॥
कपीशमक्ष हन्तारं वन्देलङ्का भयंकरम् ॥७॥
लङ्कावास नमस्तुभ्यं पौलस्त्य कुलसम्भव ॥
राक्षसाधिपतेदेव नमस्तेऽस्तु विभिषण ॥८॥

इमानि पुष्पाणि मनोहराणि सुरासुराणा मपिदुर्लभानि ॥
कल्पद्रुमादि द्रुमजानितानि पुष्पाञ्जलिर्मेस्तु सुखाय नित्यम्॥

पुष्पाञ्जलिं समर्पयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ॥

अब नमस्कार गर्ने–

चिरञ्जीवि यथात्वंभो मविष्यामि तथामुने।
रूपवान धनवाँश्चैव श्रियां युक्तञ्च सर्वदा॥
मार्कण्डेय नमस्तेऽस्तु सप्तकल्पान्त जीवन।
आयुरारोग्य सिध्यर्थं प्रसीद भगवन् मुने।
चिरञ्जीवि यथा त्वंभो मुनिनां प्रवरद्विज।
कुरुष्व मुनिशार्दूल तथामां चिरजीविनम्॥
मार्कण्डेय महाभाग सोमवंश समुद्भव।
महातपो मुनिश्रेष्ठ मार्कण्डेय नमोस्तुऽते॥
मार्कण्डेयाय मुनये नमस्ते महदायुषे।
चिरञ्जीवि यथा त्वंभो भविष्यामि तथा मुने॥
मार्कण्डेयं महाभाग सप्तकल्पान्त जीवन।
नारायणायुरारोग्यै र्मम सौख्य सुखप्रद॥
सौम्यमूर्ते नमस्तुभ्यं मृगुवंश घटाय च।

महातपो मुनिश्रेष्ठ सप्तकल्पान्त जीवन ॥
मार्कण्डेय नमस्तुभ्यं दीर्घायुष्यं प्रयच्छमे ॥
मार्कण्डेय महाभाग प्रार्थयेऽहं कृताञ्जलिः ॥

नमस्कारं समर्पयामि मार्कण्डेयाद्यष्ट चिरञ्जीविभ्यो नमः ॥

अब ज्योतिषीले बताए अनुसार अरिष्ट दान गर्नुपर्ने भए यहाँ अब गर्नुपर्दछ यसको विधि यो पूजा बिधि समाप्त भए पछि ग्रहै पिच्छेका दानका लागि आवश्यक पर्ने सामानहरू र ग्रहहरूको सो सामानमा पूजा र दान सङ्कल्प दिइएको छ सोहि अनुसार गर्न गराउन हुन ॥

अब अर्घ निवेदन गर्ने दिने–

तापत्रय हरं दिव्यं परमानन्द लक्षणम् ॥
तापत्रय विनिर्मुक्तं तवार्घ्यं कल्पयाम्यहम् ॥
अर्घ्यं गृहाण ब्रह्मज्ञ गन्धपुष्पाक्षतैर्युतम् ॥
करुणाकर विप्रेश प्रशन्नोभव सर्वदा ॥
भनी अर्घ दिने ॥

अर्घलाई त्रिकुटीमै ल्याई घोप्ट्याउने पूजा गर्ने–

न्युब्जार्घपात्राय नमः ॥

अब उत्तानो गरि राख्ने अलिकति जल हालि दिने॥

पूर्ण पात्र गर्ने—

अद्येह मम वर्षबृद्धौ जन्म दिवसे जन्मोत्सव कर्मणि अद्य दिनात् वर्ष दिन पर्यन्तम् दीर्घायु रारोग्याभि बृद्धये दीप कलश गणेश पूजन पूर्वक कृतस्य मार्कण्डेयाद्यष्ट चिरंजीवि पूजन कर्मणः परिपूर्णार्थं इदं तण्डुल पूर्णपात्रम् अन्नं प्रजापति दैवतं यज्ञोपवीतं विष्णु दैवतं रौप्यं चन्द्र दैवतं फलं वनस्पति दैवतं गोत्राय शर्मणे ब्राह्मणाय पूर्णपात्रत्वेन तुभ्यमहंसंप्रददे तत्सन्नमम । भनी दिने ॥

सर्वारिष्ट गोदान गर्ने—

गाईको पूजा माथि प्रायश्चित गोदानमा गरे जस्तै गरी गाईको मूल्य कल्पना गरी बोहोतामा छुट्याउने र पूजा गर्ने—

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमोब्रह्म सुताभ्यश्च पवित्राभ्यो नमोनमः ॥
ॐ इरावती धेनुमती हि भूतꣳ सुयवसिनी
मनवे दशस्याः व्यस्कब्भ्नारोदसी विष्णवे
तेदार्घत्थ्य पृथिवी मभितोमयूखैः स्वाहा ॥
ॐ गवेनमः ।

अब ब्राह्मणलाई टीका लगाई दिने—ब्राह्मणले भन्ने—

ॐ आकृष्णे नरजसा वर्तमानो निवेशयन्न मृतंमर्त्यञ्च।
हिरण्य येन सविता रथेना देवो याति भुवनानि पश्यन्॥

अब गोदानमा रहेको कुशले त्यहिको जलले तर्पण गर्ने र भन्ने–

ॐ मनो मे तर्पयत, वाचम्मे तर्पयत,
प्राणम्मे तर्पयत, चक्षुर्मेतर्पयत,
श्रोत्रम्मेतर्पयतात्मानं मे तर्पयत, प्रजान्मे तर्पयत,
पशून्मे तर्पयत, गणान्मे तर्पयत, गणान्मे मा वितृषन्।

कुश जौ तिल लिई गाईलाई छुने–

पूर्व सङ्कल्प सिद्धिरस्तु मम इह वर्ष बृद्धौ जन्मदिवसे श्री मार्कण्डेयाद्यष्ट चिरञ्जीवि प्रीतिद्वारा सकलारिष्ट दुष्कृत समन पूर्वकं दीर्घायुरारोग्य बृद्ध्यर्थं जन्मोत्सव कर्माङ्गतया आदौ दीप कलश गणेश पूजन पूर्वक मार्कण्डेयाद्यष्ट चिरञ्जीविनाम् आवाहन स्थापन पूजन कर्मणः प्रतिष्ठा साङ्गता सिद्ध्यर्थम् जन्म लग्नाद् वर्ष लग्नाद् गोचराच्च अरिष्ट स्थान स्थितः सूर्यादि नवग्रहैः सूचित सूच्यमान सूचयिष्य माणसर्वारिष्ट निवारण पूर्वक शुभैकादश स्थान स्थितवत्फल प्राप्त्यर्थम् योगिनी दशातः अशुभजन्य पीडा

निवृत्ति पुरःसरं शुभफलावाप्त्यर्थं च इमां गां रुद्रदैवतां गोप्रत्याम्नायी भूत द्रव्यं रौप्यं चन्द्र दैवतं वा प्रचलित द्रव्यं वनस्पतिदैवतम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय गोदानत्वेन तुभ्यमहं संप्रददे ॥ **भनी ब्राह्मणलाई दिने ॥**

फूल अक्षता लिएर गाईको प्रार्थना गर्ने–

कपिले सर्व देवानां पूजनीयाऽसि रोहिणी ।
तीर्थ देवमयी यस्मात् तस्मात् शान्तिं प्रयच्छमे ॥
गावो ममाग्रतः सन्तु गावोमे सन्तुपृष्ठतः ।
गावोमे हृदये सन्तु गवांमध्ये बसाम्यहम् ॥
पूजितासि वसिष्ठेन विश्वामित्रेणधीमता ॥
सुरभि हरमेपापं यन्मया दुःस्कृतं कृत्तम् ॥

दान प्रतिष्ठा रुपैयाँलाई पूजा गरी कुशको टुक्रा लिई दान प्रतिष्ठा समाउने–

अद्य कृतैतत् प्रायश्चित गोदान कर्मणः प्रतिष्ठा साङ्गता सिध्यर्थम् अमुकगोत्राय अमुकशर्मणे सुपूजिताय ब्राह्मणाय गोदानदान दान प्रतिष्ठा त्वेन तुभ्य महं संप्रददे तत्सत् न मम ॥ ॐ स्वस्ति भन्ने ॥

अब जलले प्रदक्षिणा गर्ने–

ॐ यानि कानि च पापानि जन्मान्तर कृतानि च।
तानि सर्वाणि नश्यन्तु प्रदक्षिण पदे पदे॥

अब अलि पर सारि नमस्कार गर्ने–

ॐ नमस्ते कपिले देवि सन्सारार्णव तारिणि।
द्विजेन्द्राय ददामित्वां प्रसन्नो भव सर्वदा॥

अब ब्राह्मणले अभिशेष गर्ने–

ॐ कोदात् कस्मा अदात् कामोदात्।
कामायादात् कामोदाता कामः प्रतिग्रहीता
कामै तत्ते॥ ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः
पृथिवी शान्ति राप शान्ति रोषधयः शान्तिः।
वनस्पतयः शान्ति र्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः
सर्वꣳशान्तिःशान्तिरेवशान्तिः सामाशान्तिरेधि॥

महाबलि दिने मन्त्र–

क्षेत्रपालाय भूत प्रेतपिशाच राक्षस शाकिनी
डाकिनी बेतालादि परिवार युताय इदंबलिं समर्पयामि।
भो भो क्षेत्रपाल इमं बलिं गृहाण मम यजमानस्यायुः
कर्ता क्षेममकर्ता बरदस्तुष्टिदो भव।

दक्षिणा सङ्कल्प–

अद्येह मम वर्ष बृद्धौ जन्मदिवसे जन्मोत्सव कर्मणि अद्य दिनात् वर्षदिन पर्यन्तं जन्म लग्नाद् वर्ष लग्नात् गोचराच्च अनिष्ठ स्थान स्थितै सूर्यादि नवग्रहैः सूचित सर्वारिष्ट शान्तये दीर्घायुरारोग्यार्थंश्च दीप कलश गणेश पूजन पूर्वकं कृतस्य मार्कण्डेयाद्यष्ट चिरञ्जीवि पूजन कर्मणः सांगता सिध्यर्थं न्यूनातिरिक्त परिपूर्णार्थं च इमां दक्षिणां रौप्यं चन्द्र दैवतं नाना नाम गोत्रेभ्यो ब्राह्मणेभ्यो कन्या कुमारीभ्यो दीना नाथेभ्यश्च दातु महं जले उत्सृजे ॥

विसर्जन गर्न फूल अक्षता लिई वरिपरि र पूजित देवताहरूमा समेत चढाउने मन्त्र–

आवाहनं नजानामि नजानामि विसर्जनम् ॥
पूजां चैव नजानामि त्वंगतिः परमेश्वर ॥
मन्त्रहीनं क्रियाहीनं विधिहीनं चयेद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥
गच्छ गच्छ सुर श्रेष्ठ स्वस्थानं परमेश्वर ॥
यत्रब्रह्मादयोदेवा तत्र गच्छ सुरेश्वर ॥
यान्तुदेवगणाः सर्वे पूजामादाय पार्थिवम् ॥
इष्टकाम प्रसिद्ध्यर्थं पुनरागमनायवै ॥

अब कायेन वाचा गर्ने—

कायेनवाचा मन सेन्द्रियैर्वा बुद्ध्यात्मनावा नुसृतेः स्वभावात्॥
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयेतत्॥
यस्यस्मृत्वा च नामोक्त्या तपोयज्ञ क्रियादिषु।
न्यूनं सम्पूर्णतांयाति सद्योवन्दे तमच्युतम्॥
ॐ अच्युताय नमः ३॥

अब कलशको जलले अभिषेक गर्दा भन्ने मन्त्र—

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः
शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः
शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेवशान्तिः
सामाशान्तिरेधि॥
तच्चक्षु र्देवहितम्पुरस्ताच्छुक्क्रमुच्चरत्॥
पश्येमशरदः शतञ्जीवे मशरदः शतꣳ शृणुयामशरदः
शतम्प्रब्रवामशरदः शतमदी नाः स्यामशरदः
शतम्भूयश्च शरदः शतात्॥
स्वस्तिनऽइन्द्रोबृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः॥
स्वस्तिन स्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु॥

विश्वानिदेव सवितुर्दुरितानिपरासुव ॥
यद्भद्रन्तन्न ऽआसुव ॥
सुरास्त्वामभिषिञ्चन्तु ब्रह्म विष्णु महेश्वराः ॥
बासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥१॥
प्रद्युम्नश्चनिरुद्रश्च भवन्तुविजयाय ते ॥
आखण्डालोडग्नि र्भगवान् यमोवै निर्ऋतिस्तथा ॥२॥
बरुणः पवनश्चैव धन धान्यस्तथा शिवः ॥
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तुते सदा ॥३॥
कीर्तिर्लक्ष्मी धृतिर्मेधा पुष्टिः श्रद्धाक्रियामतिः ॥
बुद्धिर्लज्जावपुः शान्तिस्तुष्टिः कान्तिश्चमासर ॥४॥
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ॥
आदित्यश्चन्द्रमा भौंमो बुधो जीवसि तार्कजाः ॥५॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिता ॥
देवदानवगन्धर्वा यक्षराक्षस पन्नगाः ॥६॥
ऋषयोमनवोगावो देवमातर एवच ॥
देवपत्न्यो द्रुमानागादित्याश्चाप्स रसोगणाः ॥७॥
अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च ॥
औषधानि च रत्नानि कालस्या वयवाश्चये ॥८॥

सरितः सागराः शैलास्तीर्थानि जल दानदाः ॥
एते त्वामभिषिञ्चन्तु सर्वकामार्थ सिद्धये ॥९॥
ब्रह्मामुरारि स्त्रिपुरान्त कारी भानुशशीभूमिसुतो बुधश्च ॥
गुरुश्च शुक्रः शनिराहु केतवः सर्वेग्रहाः शान्तिकरा भवन्तु।

पहिले प्रसाद देवताहरूलाई छुट्याउने अनि प्रसाद लगाई दिंदा भन्ने मन्त्र–

ॐश्रीर्वर्चस्वमायुष्यमारोग्यमामिधात्पवमानं महीयते॥
धनं धान्यं पशून् बहुपुत्रलाभं शत सम्बत्सरं दीर्घमायुः ॥
मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ॥
शत्रूणां बुद्धि नाशोऽस्तु मित्राणामुदयस्तव ॥
सिद्धिरस्तु क्रियारम्भे बृद्धिरस्तु धनागमे ॥
पुष्टिरस्तु शरीरेषु शान्तिरस्तु गृहादिषु ॥

पूजा गरिएको पोटलिका झिकी दाँया हातमा बाँध्दा भन्ने–

मार्कण्डेय महाभाग आयुरारोग्य दायक।
शुभदौ विघ्नहर्तारौ भानुविघ्नेश एवच ॥
धारयामि भुजे सव्ये मम कल्याण हेतवे।
पूरयध्वं सदाऽस्माकं कामनां सुख संयुताम् ॥

अब दूध तिल सखर मिलाई मन्त्र पढ्दै दुवै अञ्जलि थापि दायाको पान गर्ने बायाको छोडने तीन पटक यो कार्य गर्ने मन्त्रः—

ॐ सतिलं गुडसंमिश्रमञ्जल्यर्घमितं पयः ।
मार्कण्डेयाद्वरं लब्ध्वा पिवाम्यायुष्य हेतवे ॥
यति भनी तीन पटक पिये पछि आचमन् गर्ने ॥

इति

ज्योतिषीले चिना टिप्पण हेरि ग्रह शान्तिको लागि यो यो ग्रहको दान, जप, पाठ आदि गर्न बताएकोमा सबै एकै कितावमा नपाईने पनि हुनसक्छ तसर्थ यसमा ग्रहका दानका सामानहरू, ग्रहका दानहरू, त्रिमधुदान, तिलपात्रदान तथा नवग्रहको पाठ तथा वैदिक मन्त्र, तान्त्रिक मन्त्र र नवग्रह तथा अष्टयोगिनी लगायतका सङ्कटा स्तोत्र, वगलामुखि स्तोत्र मृत्युञ्जय स्तोत्र पाठहरू र तान्त्रिक मन्त्र समेत समावेश छ उपयुक्तता अनुसार गर्ने ॥

ग्रहैपिच्छेको दानहरूको सामान–

(सूर्यको दानको सामान)

माणिक, गोधुम, गुड, सवत्स गाई, रक्तवस्त्र, ताम्र, रक्त चन्दन, पद्म, शिव पूजा ॥ जप ७०००

(चन्द्रमाको दान सामान)

बंशपात्र, मुद्ग, तण्डुल, श्वेतवृष, श्वेत वस्त्र, श्रीखण्ड, रौप्य, कर्पूर, यज्ञोपवीत, धृतकुंभ दान, देवी पूजा ॥ जप ११०००

(भौमको)

मुगा, गोधुम, गुड, रक्तवृष, रक्तचन्दन, मुसुरो, सुवर्ण, ताम्र, करवीर पुष्प, गणेश पूजा ॥ जप १००००

(बुधको)

पञ्चरत्न, मुँगी, माष, घृत, नीलवस्त्र, पन्ना, कस्तूरी, सुवर्ण, हस्तिदन्त, सर्वपुष्प, विष्णु पूजा ॥ जप ८०००

(वृहस्पतिको)

पुष्पराज, लवण, हलेदो, पीतवस्त्र, पीतधान्य, हरिद्रा, शर्कर, सुवर्ण, कुलदेवताको पूजा ॥ जप १९०००

(शुक्रको)

हिरक, श्वेत गौ, तण्डुल, चित्र वस्त्र, सुवर्ण, रौप्यं, श्रीखण्ड, इन्द्राणी पूजा ॥ जप ११०००

(शनिश्चरको)

नीलमणि, भैसीं, कृष्ण गौ, लोह, माष, तिल, फलामको भाडामा तेल, गहत, देवी पूजा ॥ पिपल पूजा जप २३०००

(राहुको)

गोमेध, अश्व, कम्बल, कालो भेडो, माष, कालो तिल, तेल, लोह, कालो वस्त्र, भैरव पूजा ॥ जप १८०००

(केतुको)

वेडूर्यमणि, अज, कम्बल, कस्तुरी, कृष्ण वस्त्र, खड्ग, माष, तिल, तेल, लवण, भैरव महाकाल पूजा ॥ जप १८०००

(मुन्था र योगिनीको)

त्रिमधु–

घृत, मधु, चिनी, पट्टवस्त्र, ताम्रपात्र, सुवर्ण, इष्टदेवताको पूजा ॥ जप २७०००

सूर्यको दानको पूजा पाठमा वैदिक मन्त्र र सङ्कल्प–

ॐ आकृष्णे न रजसाव्वर्त मानोनिवेशयन्नमृतम्मर्त्यञ्च॥

हिरण्ययेनसवितारथेना देवोयातिभुवनानिपश्यन्॥

मन्त्र पढी सामान र ब्राह्मणलाई पूजा गर्ने ।

कुश जौ तिल पानी लिई छुने सङ्कल्प–

पूर्व सङ्कल्प सिद्धिरस्तु अद्येह अमुकगोत्र अमुकप्रवर अमुकशर्मा (वर्मा/गुप्तो) अहं मम वर्ष बृद्धौ.......वर्ष प्रवेशे जन्म दिवसे जन्मोत्सव कर्मणि जन्म लग्नात्.......स्थान स्थितेन वर्ष लग्नात् ....स्थान स्थितेन गोचरात्......स्थान स्थितेन सूर्यग्रहेण सूचित सूच्यमान सूचयिष्यमाण सकलारिष्ट शान्ति पूर्वक शुभैकादशस्थान स्थितवत शुभफलप्राप्त्यर्थं दीर्घायुरारोग्यैश्वर्योदय प्राप्त्यर्थं श्री सूर्य प्रीतये रक्तवस्त्रं बृहस्पति दैवतं, सुवर्णं वह्नि दैवतं, माणिक्यं वरुण दैवतं, गो धूमान्प्रजापति दैवतान्, पद्म पुष्पं करवीर पुष्पंश्च लक्ष्मी दैवतं, रक्त चन्दन काष्ठं वनस्पति दैवतं, ताम्रं श्री सूर्य दैवतं, गुडं सोम दैवताकम्, गां रुद्र दैवतां वा तन्मूल्य द्रव्यं वनस्पति दैवतम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्य महं सम्प्रददे तत्सन्नमम। भनी कुश दिने॥

फूल अक्षता लिई प्रार्थनाः—

पद्मासनः पद्मकरो द्विवाहुः ।
पद्म द्युतिः सप्त तुरङ्गवाह ॥
दिवा करो लोक गुरुः किरीटी ।
मयि प्रसादं विदधातुदेवः ॥

श्री सूर्याय नमः ॥ भनी चढाई दिने ॥

दान प्रतिष्ठालाई रुपैया र कुश पानी लिनेः—

अद्य कृतस्य माणिक्य स्यवस्त्रादि द्रव्य दान कर्मणः साद्‌गुण्यार्थम् प्रचलित द्रव्यं वनस्पति दैवतम् अमुकगोत्राय शर्मणे ब्राह्मणाय दान प्रतिष्ठा त्वेन तुभ्यमहं संप्रददे अनेन दान कर्मणा श्री सूर्यः प्रीयताम् ॥ **भनी रुपैया र कुश दिने ॥**

ब्राह्मणले श्री सूर्य ग्रह प्रशन्नोस्तु ॥ **भनी प्रसाद लगाई दिने ॥**

चन्द्रमाको दानको पूजा पाठमा वैदिक मन्त्र र सङ्कल्प—

ॐ इम न्देवा ऽअसपत्नꣳ सुवद्धंम्महतेक्षत्रायमहते ज्यैष्ठ्यायमहते जानराज्ज्यायेन्द्रस्येन्द्रियाय ॥ इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोमीराजा सोमोस्माकंब्राह्मणानाꣳ राजा ॥

मन्त्र पढी सामान र ब्राह्मणलाई पूजा गरी कुश जौ तिल पानी लिई छुने सङ्कल्प–

पूर्व सङ्कल्प सिद्धिरस्तु अद्येह अमुकगोत्र अमुकप्रवर अमुकशर्मा (वर्मा/गुप्तो) अहं मम वर्ष बृद्धौ जन्म दिवसे जन्मोत्सव कर्मणि जन्म लग्नात्......स्थान स्थितेन वर्ष लग्नात्.......स्थान स्थितेन गोचरात्......स्थान स्थितेन चन्द्रग्रहेण सूचित सूच्यमान सूचयिष्यमाण सकलारिष्ट समन पूर्वक शुभैकादशादि शुभस्थान स्थितवत्फलप्राप्त्यर्थं श्री चन्द्रग्रह प्रीतये धृतकलशं मृत्युञ्जय दैवतं, श्वेतवस्त्रं बृहस्पति दैवतम्, रजतं चन्द्र दैवतं, वंशपात्रं विश्वकर्म दैवतं, श्रीखण्ड काष्ठं वनस्पति दैवतं, शङ्खं समुद्र दैवतं, भौतिकं वरुण दैवतं, कर्पूरं गन्धर्व दैवतं, तण्डुलान् प्रजापति दैवत, दधिं समुद्र दैवताम्, श्रीचन्द्रग्रह प्रीतये तन्मूल्य द्रव्यं वनस्पति दैवतम् अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृज। भनी दिने ॥

फूल अक्षता लिई प्रार्थनाः–

श्वेताम्बरः श्वेतविभूषणश्च श्वेत द्युतिर्दण्ड करोद्विवाहुः।
चन्द्रोऽमृतात्मा वरदः किरीटी श्रेयांसिमह्यं विदधातु देवः ॥
ॐ चन्द्राय नमः ॥ भनी चढाई दिने ॥

दान प्रतिष्ठाको लागि रुपैया र कुश पानी लिनेः–

अद्य कृतैतत् तण्डुल शङ्ख धृतादि नानाद्रव्यः दानप्रतिष्ठा साङ्गता सिद्ध्यर्थम् अमुकद्रव्यंम् अमुकदैवतम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥ अनेन दान कर्मण श्री चन्द्रग्रह प्रीयताम् ॥ भनी रुपैया र कुश दिने ॥ब्राह्मणले चन्द्र ग्रह प्रशन्नोस्तु ॥ भनी प्रसाद लगाई दिने।

भौमको दानको पूजा पाठमा वैदिक मन्त्र र सङ्कल्पः–

ॐ अग्नि मूर्द्धा दिवः ककुत्त्पतिः पृथिव्याऽअयम्।
अपाꣳ रेताꣳ सिजिन्न्वति॥

मन्त्र पढी सामान र ब्राह्मणलाई पूजा गर्ने।

कुश जौ तिल पानी लिई छुने सङ्कल्प–

पूर्व सङ्कल्प सिद्धिरस्तु अद्येह अमुकगोत्र अमुकप्रवर अमुकशर्मा (वर्मा/गुप्तो) अहं मम वर्ष बृद्धौ जन्म दिवसे जन्मोत्सव कर्मणि जन्म लग्नात्........स्थान स्थितेन वर्ष लग्नात्......स्थान स्थितेन गोचरात्......स्थान स्थितेन भौम ग्रहेण सूचित सूच्यमान सूचयिष्यमाण सकल पीडा बाधा निवृत्यर्थं भौम ग्रह प्रीतये दीयमानं इदं प्रवालं बरुण दैवतं

रक्त वस्त्रं बृहस्पति दैवतं गोधुमान्मसुराञ्च प्रजापति दैवतं रक्त वृषं मृत्युञ्जय दैवतं सुर्वर्णं वह्नि दैवतं गुडं सोम दैवतं रक्तचन्दन काष्ठं वनस्पति दैवतं करवीर पुष्पं सूर्य दैवतं ताम्रं सूर्य दैवतं तन्मूल्यं प्रचलित द्रव्यं वनस्पति दैवतम् अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे॥ भनी कुश दिने॥

फूल अक्षता लिई प्रार्थना–

रक्तांवरो रक्त वपुः किरीटी चतुर्भुजो मेष गमो गदा भृतः॥
धरासुतः शक्ति धरश्च शूली सदाममस्या द्वरदः प्रशान्तः॥
ॐ भौमाय नमः॥ भनी चढाई दिने॥

दान प्रतिष्ठाको लागि रुपैया र कुश पानी लिने–

अद्यकृतस्य गोधुम वृष प्रवलादि नानाद्रव्य दान प्रतिष्ठा साङ्गता सिद्ध्यर्थं अमुकद्रव्यम् अमुकदैवतमं अमुकगोत्राय शर्मणे ब्राह्मणाय दातुमहम् उत्सृजे। अनेन दान कर्मणि भौम ग्रह प्रीयताम्॥ भनी रुपैया र कुश दिने॥ ब्राह्मणले श्री भौमग्रह प्रशन्नोस्तु॥ भनी प्रसाद लगाई दिने॥

बुधको दानको पूजा पाठमा वैदिक मन्त्र र सङ्कल्प–

ॐ उद्‌बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसꣳ सृजेथामयञ्च॥ अस्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत॥

मन्त्र पढी सामान र ब्राह्मणलाई पूजा गर्ने ।

कुश जौ तिल पानी लिई छुने सङ्कल्प - हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ पूर्व सङ्कल्प सिद्धिरस्तु अद्येह अमुकगोत्र अमुकप्रवर अमुकशर्मा (वर्मा/गुप्तो) अहं मम वर्ष बृद्धौ जन्म दिवसे जन्मोत्सव कर्मणि जन्म लग्नात्.......स्थान स्थितेन तथा वर्ष लग्नात्.......स्थान स्थितेन तथा गोचरात्........स्थान स्थितेन बुध ग्रहेण सूचित सूच्यमान सूचयिष्यमाण सकलारिष्ट समन पूर्वकं शुभैकादशादि स्थानस्थितवत्फल प्राप्तये दीयमानाम् इदं नीलबस्त्रं बृहस्पति दैवतं, मुद्‌गान् प्रजापति दैवतान्, मरकतमणिं समुद्र दैवतं, सुवर्णम् अग्नि दैवतम्, घृतं समुद्र दैवतं, काश्यं चन्द्र दैवतं, गजदन्तं शिव दैवतं् गोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे॥ **भनी कुश दिने॥**

फूल अक्षता लिई प्रार्थना गर्ने–

प्रियङ्गु कलिकाश्यामो रूपेणा प्रतिमो भुवि।
सौम्य सौम्य गुणोपेत सदास्तुवरदोमम॥
ॐ बुधाय नमः॥ **भनी चढाई दिने॥**

दान प्रतिष्ठाको लागि रुपैया र कुश पानी लिने–

अद्यकृतैतन् मकरतमणि वस्त्र मुग्दादि द्रव्यदान प्रतिष्ठार्थम् अमुकद्रव्यम् अमुकदैवतं गोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे ॥ अनेन दान कर्मण बुध ग्रह प्रीयताम् । भनी रुपैया र कुश दिने । ब्रह्मणले बुध ग्रह प्रशन्नोस्तु ॥ भनी प्रसाद लगाई दिने ॥

बृहस्पतिको सामानको पूजा पाठको वैदिक मन्त्र र सङ्कल्प–

ॐ बृहस्पते ऽअतियदर्योऽअर्हाद्युमद्विभाति क्क्रतुमज्जनेषु ।

यद्दीदयच्छ्वसऽऋतप्रजात तदस्मासु द्द्रविणन्धेहि चित्रम् ॥

उपयामगृहीतोसि बृहस्पतये त्वैषते योनिर्बृहस्पतयेत्वा ॥

मन्त्र पढी सामान र ब्राह्मणलाई पूजा गर्ने ।

कुश जौ तिल पानी लिई छुने सङ्कल्प –

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ पूर्व सङ्कल्प सिद्धिर स्तु अद्येह अमुकगोत्र अमुकप्रवर अमुकशर्मा (वर्मा/गुप्तो) अहं मम वर्ष बृद्धौ जन्म दिवसे. ज़न्मोत्सव कर्मणि जन्म लग्नात्.......स्थान स्थितेन वर्ष लग्नात्......स्थान स्थितेन

गोचरात् ....स्थान स्थितेन बृहस्पति ग्रहेण सूचित सूच्यमान सूचयिष्यमाण सकलारिष्ट शान्ति पूर्वक शुभैकादश स्थान स्थितवत्शुभ फल प्राप्त्यर्थं दीर्घायुरारोग्यै श्वर्योदय प्राप्त्यर्थञ्च सुवर्णं वन्हि दैवतं, पीतबस्त्रं बृहस्पति दैवतं, पीत धान्यं प्रजापति दैवतं, पुष्परागं समुद्र दैवतं लवण, शर्करा च सोम दैवतां, हरिद्रां वनस्पति दैवताम् अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे ॥ भनी कुश दिने ॥

फूल अक्षता लिई प्रार्थना–

सुराणां च मुनीनां च गुरुः कनक सन्निभः ॥
बुद्धि दातात्रिलोकस्य समांरक्षतु वाक्पतिः ॥
ॐ बृहस्पतये नमः ॥ भनी चढाई दिने ॥

दान प्रतिष्ठाको लागि रुपैया र कुश पानी लिने–

अद्यकृतैतत् कृतस्य सुवर्ण पीतः धान्य बस्त्रादि नाना द्रव्य दान प्रतिष्ठा साङ्गता सिद्ध्यर्थम् अमुकद्रव्यम् अमुकदैवतम् अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे ॥ अनेन दान कर्मण बृहस्पति ग्रह प्रीयताम् । भनी रुपैया र कुश दिने ॥ ब्राह्मणले श्री बृहस्पति ग्रह प्रसन्नोस्तुं भनी प्रसाद लगाई दिने ॥

शुक्रको सामानको पूजा पाठको वैदिक मन्त्र र सङ्कल्प–

ॐ अन्नात्परिस्रुतोरसंब्रह्मणा व्यपिवत्क्षत्रम्पयः सोमम्प्रजापतिः॥ ऋतेन सत्यमिन्द्रियं विपानꣳशुक्क्रमन्धसऽइन्द्रस्येन्द्रिय मिदम्पयोमृतम्मधु॥

मन्त्र पढी सामान र ब्राह्मणलाई पूजा गर्ने ।

कुश जौ तिल पानी लिइ छुने सङ्कल्प–

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ पूर्व सङ्कल्प सिद्धिरस्तु अद्येह अमुकगोत्र अमुकप्रवर अमुकशर्मा (वर्मा/गुप्तो) अहं मम वर्ष बृद्धौ जन्म दिवसे जन्मोत्सव कर्मणि जन्म लग्नात्.........स्थान स्थितेन वर्ष लग्नात्.......स्थान स्थितेन गोचरात्.......स्थान स्थितेन शुक्र ग्रहेण सूचित सूच्यमान सूचयिष्यमाण सकलारिष्ट शान्ति पूर्वक शुभैकादश स्थान स्थितवत् शुभफलप्राप्त्यर्थं दीर्घायुरारोग्यैं स्वर्योदयोत्तरोत्तर हर्ष बृद्धि प्राप्त्यर्थं च श्वेत बस्त्रं बृहस्पति दैवतं तण्डुलान् प्रजापति दैवतान् श्रीखण्ड काष्ठं वनस्पति दैवतं रौप्यं चन्द्र दैवतं सुवर्णं वह्नि दैवतम् हिरकं समुद्र दैवतं सुगन्धम् अप्सरदैवतम् अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे॥ **भनी कुश दिने ।**

फूल अक्षता लिई प्रार्थना गर्ने –

हेमकुम्भमृडालाभो दैत्यानां परमो गुरुः ॥

सर्वशास्त्रार्थ वक्ता च भार्गवो वरदः स्तुतः ।

ॐ शुक्राय नमः॥ भनी चढाई दिने ॥

दान प्रतिष्ठाको लागि रुपैया र कुश पानी लिने–

अद्यकृतैतत् कृतस्य हिरक तण्डुलादिनाना द्रव्य दान कर्मण प्रतिष्ठा साङ्गता सिद्ध्यर्थम् अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे॥ अनेन दान कर्मण श्री शुक्रग्रह प्रीयताम् ॥ भनी रुपैया र कुश दिने ॥ ब्राह्मणले श्री शुक्रग्रह प्रशन्नोस्तु भनी प्रसाद लगाई दिने ॥

शनिश्चरको सामानको पूजा पाठको वैदिक मन्त्र र सङ्कल्प–

ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥

शँय्योरभिस्रवन्तु नः ॥

मन्त्र पढी सामान र ब्राह्मणलाई पूजा गर्ने ।

कुश जौ तिल पानी लिई छुने सङ्कल्प–

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ पूर्व सङ्कल्प सिद्धिरस्तु अद्येह अमुकगोत्र अमुकप्रवर अमुकशर्मा (वर्मा/गुप्तो) अहं मम वर्ष बृद्धौ जन्म दिवसे जन्मोत्सव

कर्मणि जन्म लग्नात्........स्थान स्थितेन वर्ष लग्नात्....... स्थान स्थितेन गोचरात्......स्थानस्थितेन शनैश्चर ग्रहेण सूचित सूच्यमान सूचयिष्यमाण सकलारिष्ट समन पूर्वक शुभैकादश स्थान स्थितवत् शुभफलप्राप्त्यर्थं दीर्घायुरारोग्यै श्वर्योदयोत्तरोत्तर हर्ष बृद्धि प्राप्त्यर्थं च नीलमणिं समुद्र दैवतं, महिषं यम दैवतं, कृष्णबस्त्रं बृहस्पति दैवतं, लोहं तैलञ्च भैरव दैवतं, तिलान् सोम दैवतान्, माषान् कुलत्थान् च प्रजापति दैवतान्, सुवर्णं वह्नि दैवतम् अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे ॥ भनी कुश दिने ॥

फूल अक्षता लिई प्रार्थना गर्ने–

नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्डसंभूतं तं नमामि शनैश्चरम् ॥
ॐ शनिश्चराय नमः ॥ भनी चढाई दिने ॥

दान प्रतिष्ठाको लागि रुपैया र कुश पानी लिने–

अद्यकृतैतत् तैल लोह कुलत्यादि नाना द्रव्य दान कर्मणः प्रतिष्ठा साङ्गता सिद्ध्यर्थम् इमां दानप्रतिष्ठा दक्षिणाम् प्रचलित द्रव्यम् वनस्पति दैवतम् अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे ॥ अनेन कर्मणाः शनिग्रहः

प्रीयताम् । भनी कुश र रुपैया दिने ॥ ब्राह्मणले श्री शनैश्चर ग्रह प्रशन्नोस्तु ॥ भनी प्रसाद लगाई दिने ॥

राहुको सामानको पूजा पाठको वैदिक मन्त्र र सङ्कल्प-

ॐ कयानश्चित्रऽआभुवदूती सदावृधः सखा ॥

कयाशचिष्ठया बृता ॥

मन्त्र पढी सामान र ब्राह्मणको पूजा गर्ने ।

कुश जौ तिल पानी लिई छुने सङ्कल्प-

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ पूर्व सङ्कल्प सिद्धिरस्तु अद्येह अमुकगोत्र अमुकप्रवर अमुकशर्मा (वर्मा/गुप्तो) अहं मम वर्ष बृद्धौ जन्म दिवसे जन्मोत्सव कर्मणि जन्म लग्नात्.........स्थान स्थितेन वर्ष लग्नात्......स्थान स्थितेन गोचरात् स्थान स्थितेन राहु ग्रहेण सूचित सूच्यमान सूचयिष्यमाण सकला रिष्ट शान्ति पूर्वक शुभैकादश स्थानस्थितवत शुभफल प्राप्त्यर्थं दीर्घायुरारोग्यै स्वर्योदयो त्तरोत्तर हर्ष बृद्ध्यर्थं च कुलत्थान प्रजापति दैवतान्, इदं कृष्ण मेषं बरुण दैवतं, गोमेदं समुद्र दैवतं, लोह खड्गं भैरव दैवतं, कृष्ण कम्बलं बृहस्पति दैवतं, सुवर्ण निर्मित सूर्यं विश्वकर्म दैवतं, सुवर्णं वह्नि दैवतं, तिलान्माषाञ्च

प्रजापति दैवतं, तैलं मृत्युञ्जय दैवतं, कृष्ण बस्त्रम् बृहस्पति दैवतम् अमुकगोत्राय शर्मणे ब्राह्मणाय दातुमहम् उत्सृजे ॥ भनी कुश दिने ॥

फूल अक्षता लिई प्रार्थना–

नीलाम्बरो नीलवपुः किरीटी कराल बक्र करवाल शूली ॥

चतुर्भुजश्चर्म धरश्च राहुः सिंहासनस्थो वरदोस्तु मह्यम् ॥

ॐ राहवे नमः॥ भनी चढाई दिने ॥

दान प्रतिष्ठाको लागि रुपैया र कुश पानी लिने–

अद्यकृतैतत् कुलत्यादि तेल लोह नाना द्रव्य दान कर्मणः प्रतिष्ठा साङ्गता सिद्ध्यर्थम् इमां दानप्रतिष्ठां दक्षिणाम् प्रचलित द्रव्यम् वनस्पति दैवतम् अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे ॥ अनेन दान कर्मण राहु ग्रहः प्रीयताम् । भनी कुश र रुपैया दिंने ॥ ब्राह्मणले श्री राहु ग्रह प्रशन्नोस्तु भनी प्रसाद लगाई दिने ॥

केतुको सामानको पूजा पाठको वैदिक मन्त्र र सङ्कल्प–

ॐ केतुं कृण्णवन्न केतवे पेशोमर्याऽअपेशसे ॥

समुषद्भिरजायथाः ॥

मन्त्र पढी सामान र ब्राह्मणको पूजा गर्ने ।

कुश जौ तिल पानी लिई छुने सङ्कल्प–

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ पूर्व सङ्कल्प सिद्धिरस्तु अद्येह अमुकगोत्र अमुकप्रवर अमुकशर्मा (वर्मा/गुप्तो) अहं मम वर्ष बृद्धौ जन्म दिवसे जन्मोत्सव कर्मणि जन्म लग्नात्.........स्थान स्थितेन वर्ष लग्नात्.......स्थान स्थितेन गोचरात्...... स्थान स्थितेन केतु ग्रहेण सूचित सूचयिष्यमाण सूचयिस्यमाण सकलारिष्ट शान्ति पूर्वक शुभैकादश स्थान स्थितवत शुभफल प्राप्त्यर्थं दीर्घायुरारोग्यै श्वर्योदयोत्तरोत्तर हर्ष बृद्ध्यर्थं च कुलत्थान प्रजापति दैवतान्, इदं वैदुर्यमणिं समुद्र दैवतम्, खड्गं भैरव दैवतं, लवणं सोम दैवतं, तिलान् सोम दैवतान्, माषान् प्रजापति दैवतान्, तैलं मृत्युञ्जय दैवतम् अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे ॥ भनी कुश दिने ॥

फूल अक्षता लिई प्रार्थना–

पलाशपुष्पसङ्काशं तारकाग्रहमस्तकम् ।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥
ॐ केतवे नमः ॥ भनी चढाई दिने ॥

दान प्रतिष्ठाको लागि रुपैया र कुश पानी लिने–

अद्यकृतैतत् कुलत्यादि वैदुर्यमणि खड्गादि नाना द्रव्य दान कर्मणः प्रतिष्ठा साङ्गता सिद्ध्यर्थं प्रचलित द्रव्यं वनस्पति दैवतम् (अमुक) गोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे ॥ अनेन दान कर्मणा केतु राहु ग्रह प्रीयताम्।

भनी कुश र रुपैया दिने ॥ ब्राह्मणले श्री केतुग्रह प्रशन्नोस्तु भनी प्रसाद लगाई दिने ॥

योगिनी दानको सामानको पूजा र सङ्कल्प

अष्ट योगिनीको त्रिमधु दानको वैदिकमन्त्र–

ॐ देवीद्वार ऽइन्द्रꣳ सङ्घाते वीड्वीर्या मन्नवर्द्धयन्।
आवत्सेनतरुणेनकुमारेण च मीवतापार्वाणꣳ
रेणुककाटन्नुदन्तांवसुवनेवसुधेयस्यव्यन्तुयज ॥

मन्त्रले सामान र ब्राह्मणलाई पूजा गर्ने ।

कुश जौ तिल पानी लिई छुने सङ्कल्प–

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ पूर्व सङ्कल्प सिद्धिरस्तु अद्येह अमुकगोत्र अमुकप्रवर अमुकशर्मा (वर्मा/गुप्तो) अहं मम वर्ष बृद्धौ जन्म दिवसे जन्मोत्सव कर्मणि योगिनी दशाया.......स्थान स्थिताया मङ्गलया

पिङ्गलया धान्यया भ्रामर्या भद्रिकया सिद्धया उल्कया सङ्कटया सूचित सूच्यमान सूचयिष्यमाण सकलारिष्ट शान्ति पूर्वक शुभस्थान स्थितवत् फल प्राप्त्यर्थम् दीर्घायुरारोग्यै श्यर्योदयोत्तरोत्तर हर्ष बृद्ध्यर्थं च इदं पट्ट बस्त्रं बृहस्पति दैवतं मधुं समुद्र दैवतम् शर्करा: सोम दैवता: घृतं समुद्र दैवतं पात्रं विश्वकर्म दैवतं, ताम्रं श्रीसूर्य दैवतम्, अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे ॥ भनी कुश दिने ॥

फूल अक्षता लिई प्रार्थना गर्ने–

यस्मात्पितृणां श्राद्धेत्वं प्रीतंमध्व मृतोपमम् ॥
त्तस्मा त्तव प्रदानेन रक्षमां दुःख सागरात् ॥
अमृतस्य कुलोत्पन्न इक्षुस्त द्रस शर्करा ॥
सूर्यप्रीति करानित्य मतः शान्तिं प्रयच्छ मे ॥
कामधेनोः समुद्भूतं देवानामुत्तमं हवि ॥
आयुर्विवर्द्धनं पुंसामतः पातु सदैव माम् ॥

जुन योगिनीको दान गरेको हो त्यसैको नाम लिई फूल अक्षता चढाई दिने ॥

दानप्रतिष्ठाको लागि रुपैया कुश पानी लिने–

अद्यकृतैतत् सताम्र पट्टवस्त्र त्रिमधु सुवर्ण दान कर्मणः सादगुण्यार्थ मिदं ताम्रं श्रीसूर्य दैवतं इमां दान प्रतिष्ठा दक्षिणां प्रचलित द्रव्यं वनस्पति दैवतम् अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे ॥ भनी कुश र रुपैया दिने ॥ ब्राह्मणले जुन योगिनीको दान गरेको हो सोही योगिनीको नाम लिई प्रशन्नोस्तु भनी प्रसाद लगाई दिने ॥

मुन्थाको सामानको पूजा र सङ्कल्प

मुन्था देवीको दानको सामानमा–

मुन्था देवी प्रीत्यर्थं दानीय सकल वस्तुभ्यो नमः

भनी सामानलाई पूजा गर्ने ।

कुश जौ तिल पानी लिई छुने सङ्कल्प –

हरिः ॐ तत्सत् ३ विष्णुः ३ पूर्व सङ्कल्प सिद्धिरस्तु अद्येह अमुकगोत्र अमुकप्रवर अमुकशर्मा अहं मम वर्ष बृद्धौ जन्म दिवसे जन्मोत्सव कर्मणि मुन्था दशाया वर्ष लग्नात......स्थान स्थितमा मुन्थया सूचित सूच्यमान सूचयिष्यमाण शकलारिष्ट शान्ति पूर्वक शुभ स्थान स्थितवत् इदं मधु घृतं च समुद्र दैवतम्, शर्कराः सोमदेवताः, ताम्र पात्रं

श्री सूर्य दैवतम्, विश्वकर्म दैवतं वा पट्ट बस्त्रं बृहस्पति दैवतम्, सुवर्णं वह्नि दैवतं अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे ॥ भनी कुश दिने ॥

फूल अक्षता लिई प्रार्थना गर्ने–

देवीद्वार इन्द्रꣳ सङ्घाते व्वीड्वीर्या मन्नवर्द्धयन्।
आवत्सेनतरुणेनकुमारेण च मीवता पार्वाणꣳ
रेणुककाटन्नुदन्तां वसुवनेवसुधेयस्यव्यन्तुयज ॥
ॐ मुन्थायै नमः ॥ भनी चढाई दिने।

दान प्रतिष्ठाको लागि रुपैया र कुश पानी लिने–

अद्यकृतैतन्मुन्थाप्रीतये कृतस्यैतस्य त्रिमधु सुवर्ण पट्ट वस्त्र ताम्रपात्र दान कर्मणः साङ्गता सिद्ध्यर्थं मिदं ताम्रं श्रीसूर्य दैवतं अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे ॥ अनेन दान कर्मणा मुन्था देवी प्रीयताम्। भनी कुश र रुपैया दिने॥ ब्राह्मणले श्री मुन्था ग्रह प्रशन्नोस्तु॥ भनी प्रसाद लगाई दिने॥

तिलपात्रको पूजा र सङ्कल्प–

ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधेपदम्।
समूढमस्यपाꣳ सुरेस्वाहा॥
भनी तिलपात्रको पूजा तथा ब्राह्मणको पूजा गर्ने।

कुश जौ तिल पानी लिई छुने सङ्कल्प–

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ पूर्व सङ्कल्प सिद्धिरस्तु अद्येह अमुकगोत्र अमुकप्रवर अमुकशर्मा (वर्मा/गुप्तो) अहं मम वर्ष बृद्धौ जन्म दिवसे जन्मोत्सव कर्मणि सर्वारिष्ट शान्त्यर्थं च दीयमानां इमान् तिलान् प्रजापति दैवतान् ताम्रं सूर्यदैवतं सौवर्णं वह्नि दैवतं ताम्रपात्रं विश्वकर्म दैवतम् बस्त्रं बृहस्पति दैवतम् अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे ॥ **भनी कुश दिने** ॥

फूल अक्षता लिई प्रार्थना–

ताम्रं पुष्टिकरं यस्मात्सर्वदोष क्षयं करम् ।
सर्वरक्षा करं यस्मादतः शान्तिं प्रयच्छमे ॥
तिलाः श्वेदसमुद्भुता पवित्राः पापनाशकाः ॥
दानेनानेन देवेश सर्वारिष्टं विनाशय ॥
नमोनमस्ते गोविन्द पुराण पुरुषोत्तम ॥
दानेनानेन देवेश प्रीयतां मे जनार्दन ॥

दान प्रतिष्ठाको लागि रुपैया र कुश पानी लिने–

अद्यकृतैतत् तिल पात्र दान कर्मणः प्रतिष्ठा साङ्गता सिद्ध्यर्थम् इमां दान प्रतिष्ठां दक्षिणां प्रचलित द्रव्यं वनस्पति दैवतम् अमुकगोत्राय शर्मणे ब्राह्मणाय दातु महम् उत्सृजे ॥ **भनी कुश र रुपैया दिने** ॥

नवग्रह स्तोत्र

श्री गणेशायनमः ॥

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् ।
तमोरिं सर्वपापघ्नंप्रणतोऽस्मि दिवाकरम् ।१।
दधिशङ्खतुषाराभं क्षीरोदार्णवसंभवम् ।
नमामि शशिनं सोमं शंभोर्मुकुटभूषणम् ।२।
धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम् ।
कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम् ।३।
प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ।४।
देवानां च ऋषीणां च गुरुं काञ्चनसन्निभम् ।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ।५।
हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।
सर्व शास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम ।६।
नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्डसंभूतं तं नमामि शनैश्चरम् ।७।
अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनं ।

सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम् ।८।

पलाशपुष्पसङ्काशं तारकाग्रहमस्तकम् ।

रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ।९।

इति व्यासमुखोद्‌गीतं यः पठेत् सुसमाहितः ।

दिवा वा यदि वा रात्रौ विघ्नशान्ति र्भविष्यति ।१०।

नरनारीनृपाणां च भवेद् दुःस्वप्न नाशनम् ।

ऐश्वर्यमतुलं तेषामा रोग्यंपुष्टिववर्धनम् ।११।

ग्रहनक्षत्रजाः पीडास्तस्कराग्निसमुद्भवाः ।

ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते नसंशयः ।१२।

इति श्रीव्यास विरचितं नवग्रह स्तोत्रं समाप्तम् ।

सूर्यस्तोत्रम्

ॐ अस्य श्रीसूर्याष्टाक्षरमन्त्रस्य देवभागऋषिर्गायत्री छन्दः श्रीसूर्यो देवता मम सूर्यग्रहानुकूल्यप्राप्तिपूर्वकाभीष्टैश्वर्यादिसिद्ध्यर्थे जपे विनियोगः। देवभागाय ऋषये नमः–शिरसि, गायत्र्यै छन्दसे नमः–मुखे, श्रीसूर्याय देवतायै नमः– हृदि, । सत्यतेजोज्वालामणे हुं फट् स्वाहा– हृदयाय नमः । ब्रह्मतेजोज्वालामणे हुं फट्– शिरसे स्वाहा । विष्णुतेजोज्वालामणे हुं फट् स्वाहा– शिखायै वषट् । रुद्रतेजाज्वालामणे हुं फट् स्वाहा– कवचाय हुम् । अग्नितेजोज्वालामणे हुं फट् स्वाहा– नेत्रत्रत्राय वौषट् । सर्वतेजोज्वालामणे हुं फट् स्वाहा– अस्त्राय फट्। आदित्याय नमः– मूर्ध्नि, रवये नमः– मुखे, । भावने नमः– हृदये, । भास्कराय नमः– गुह्ये। सूर्याय नमः– पादयो। ॐ नमः– मुर्ध्नि । घृं नमः– आस्ये । णिं नमः– कण्ठे । सूँ नमः– हृदये । र्यं नमः– कुक्षौ । आँ नमः– नाभौ । दिं नमः– ध्वजे। त्यं नमः– पादयोः ॥

श्रीगणेशाय नमः ॥

नवग्रहाणां सर्वेषां सूर्यादीनां पृथक् पृथक् ॥
पीडा च दुः सहा राजञ्जायते सततं नृणाम् ॥१॥
पीडानाशाय राजेन्द्र नामानि श्रृणु भास्वतः ॥
सूर्यादीनां च सर्वेषां पीडा नश्यति श्रृण्वतः ॥२॥
आदित्यः सविता सूर्यः पूषार्कः शीघ्रगो रविः ।
भगस्त्वष्टाऽर्यमा हंसो हेलिस्तेजोनिधिर्हरिः ॥३॥
दिननाथो दिनकरः सप्तसप्तिः प्रभाकरः ।
विभासुर्वेदकर्ता च वेदाङ्गो वेदवाहनः ॥४॥
हरिदश्वः कालवक्त्रः कर्मसाक्षी जगत्पतिः ।
पद्मिनीबोधको भानर्भास्करः करुणाकरः ॥५॥
द्वादशात्मा विश्वकर्मा लोहिताङ्गस्तमोनुदः ।
जगन्नाथोऽरविन्दाक्षः कालात्मा कश्यपात्मजः ॥६॥
भूताश्रयो ग्रहपतिः सर्वलोकनमस्कृतः ।
तिमीराछन्नसंकाशो भास्वानदितिनन्दनः ॥७॥
ध्वान्तेभसिंहः सर्वात्मा लोकनेत्रो विकर्तनः ।
मार्तण्डो मिहिरः सूरस्तपनो लोकतापनः ॥८॥
जगत्कर्ता जगत्साक्षी शनैश्चरपिता जयः ।

सहस्ररश्मिस्तरणि भगवान्भक्तवत्सलः ॥९॥
विवस्वानादिदेवश्च देवदेवो दिवाकरः ।
धन्वन्तरिर्व्याधिहर्ता दद्रुकुष्ठविनाशनः ॥१०॥
चराचरात्मा मैत्रेयोऽमितो विष्णुर्विकर्तनः ॥
कोकशोकापहर्ता च कमलाकर आत्मभूः ॥११॥
नारायणो महादेवो रुद्रः पुरुष ईश्वरः ।
जीवात्मा परमात्मा च सूक्ष्मात्मा सर्वतोमुखः ॥१२॥
इन्द्रोऽनलो यमश्चैव नैर्ऋतो परुणोनिलः ।
श्रीद ईशान इन्दुश्च भौम सौम्यो गुरु कविः ॥१३॥
शौरिर्विन्धुन्तुदः केतुः कालः कालात्मको विभुः ।
सर्वदेवमयो देवः कृष्ण कायप्रदायकः ॥१४॥
य एतैर्नामभिर्मर्त्यो़भक्त्या स्तौति दिवाकरम् ।
सर्वपापविनिर्मुक्त सर्वरोगविवर्जितः ॥१५॥
पुत्रवान् धनवान् श्रीमाञ्जायते स न संशयः ।
रविवारे पठेद्यस्तु नामान्येतानि भास्वतः ॥१६॥
पीडाशान्तिर्भवेत्तस्य ग्रहाणां च विशेषतः ।
सद्यः सुखमवाप्नोति चायुर्दीर्घ च नीरुजम् ॥१७॥

विशाखा नक्षत्र सप्तमी तिथिको दिन काश्यम गोत्रभई कलिङ्ग देशमा क्षेत्री जातमा जन्मेको हातमा कमलको फूललिई कमलकै बीचमा आसन गरी एउटा हातले वर (आशिर्वाद) दिई सात ओटा घोडा भएको रथमा विराजमान भई भक्तजनको सम्पूर्ण पाप नाश गरी लोकलाई रक्षा गर्ने भएको श्री सूर्यनारायणले मेरो दुःख हरण गरिदेऊ।

सूर्यको तान्त्रिक जप मन्त्र–

ॐ ह्रीं ह्रीं सूर्याय नमः ॥ वा ॐ घृणिः सूर्याय नमः ॥

वैदिक मन्त्र–

ॐ आकृष्णेनरजसाव्वर्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥
हिरण्ययेनसवितारथेना देवो यातिभुवनानिपश्यन् ॥

चन्द्रस्तोत्रम्

ॐ अस्य श्रीचन्द्रषडक्षरमन्त्रस्य भृगुऋषिः पङ्क्तिश्छन्द श्रीचन्द्रो देवता मम चन्द्रग्रहानुकूल्यप्राप्तिपूर्वकाभीष्टैश्वर्यादि सिद्ध्यर्थे जपे विनियोगः। भृगवे ऋषये नमः– शिरसि। पङ्क्तयै छन्दसे नमः– मुखे। श्री चन्द्राय देवतायै नमः– हृदि। सां–

अङ्गुष्ठाभ्यां नमः । सीँ –तर्जनीभ्यां नमः । सूँ- मध्यमाभ्यां नमः । सैँ- अनामिकाभ्यां नमः । सौँ- कनिष्ठिकाभ्यां नम । सः- करतलपृष्ठाभ्यां नमः । साँ- हृदयाय नमः । सीँ- शिरसे स्वाहा । सूँ- शिखायै वषट्। सैँ- कवचाय हुम्। साँ- नेत्रत्रयाय वौषट्। सः- अस्त्राय फट्।

श्रीगणेशाय नमः ॥

चंद्रस्य श्रृणु नामानि शुभदानि महीपते।
यानि श्रृत्वा नरो दुःखान्मुच्यते नात्र संशयः ॥१॥
सुधाकरश्च सोमश्च ग्लौरब्जः कुमुदप्रियः ।
लोकप्रियः शुभ्रभानुश्चंद्रमा रोहिणीपतिः ॥२॥
शशी हिमकरो राजा द्विजराजो निशाकरः ।
आत्रेय इन्दूः शीतांशुरोषधीशः कलानिधिः ॥३॥
जैवातृको रमाभ्राता क्षीरोदार्णवसम्भव।
नक्षत्रनायकः शंभुः शिरचूडामणिर्विभुः ॥४॥
तापहर्ता नभोदीपोनामान्येतानि यः पठेत्।
प्रत्यहं भक्तिसंयुक्तस्तस्य पीडा विनश्यति ॥५॥
ग्रहादीनां च सर्वेषां भवेच्चन्द्रबलं सदा ॥६॥

कृतिका नक्षत्र ज्यष्ठकृष्णपक्षको चतुर्दशी तिथिको दिन आत्रेय गोात्र भई वैश्य जातीमा जन्मेका हातमा गदा लिई एउटा हातले वर दिई सेतो वस्त्र लगाएका सेतै गहना लगाएका १० ओटा घोडा भएको रथमा विराजमान भएका श्री शिवजीको मुकुटको गहना भई शोभायमान भएको श्री चन्द्रदेवले मेरो दुःख हरण गरिदेऊ।

चन्द्रको जप मन्त्र–

ॐ ऐँ ह्रीँ सोमाय नमः ॥ वा ॐ सौँ सोमाय नमः ॥

वैदिक मन्त्र–

इमन्देवाऽअसपत्क्न६ सुवद्धम्महतेक्षत्रायमहते ज्यैष्ठ्यायमहते जानराज्ज्यायेन्द्रस्येन्द्रियाय ॥ इमममुष्य पुत्रममुष्यै पुत्रमस्यै व्विशऽएष वोमीराजा सोमोस्माकम्ब्राह्मणाना६. राजा ॥

मङ्गलस्तोत्रम्

ॐअस्य श्री भौमाष्टाक्षरमन्त्रस्य ब्रह्मा ऋषिर्गायत्री छन्दः श्रीभौमो देवता मम भौमग्रहानुकूल्यप्राप्तिपूर्वकाभीष्टैश्वर्यादि सिद्ध्यर्थे जपे विनियोगः। ब्रह्मणे ऋषये नम- शिरसि। गायत्र्यै छन्दसे नमः– मुखे। श्रीभौमाय देवतायै नमः– हृदि। आँ नमः

स्वाहा- अङ्गुष्ठाभ्यां नमः । ईं नमः स्वाहा- तर्जनीभ्याँ नमः । ॐ नमः स्वाहा- मध्यमाभ्यां नमः । ऐँ नमः स्वाहा- अनामिकाभ्यां नमः । औँ नमः स्वाहा- कनिष्ठाकाभ्यां नमः ।

श्रीगणेशाय नमः ॥

अङ्गारकः शक्तिधरो लोहिताङ्गो धरासुतः ।
कुमारो मङ्गलो भौमो महाकायो धनप्रदः ॥१॥
ऋणहर्ता दृष्टिकर्ता रोगकृद्रोगताशनः ।
विद्युत्प्रभो वणकरः कामदो धनह्नृत्कुजः ॥२॥
सामगानप्रियोरक्त वस्त्रो रक्तायतेक्षणः ।
लोहितो रक्तवर्णश्च सर्वकर्मावबोधकः ॥३॥
रक्तमाल्यधरोहेम कुंण्डली ग्रहनायकः ॥
नामान्येतानि भौमस्य यः पठेत्सततं नरः ॥४॥
ऋणं तस्य च दौर्भाग्यं दारिद्र्यं च विनश्यति ।
धनं प्राप्नोति विपुलं स्त्रियं चैव मनोरमाम् ॥५॥
वंशोद्योतकरं पुत्रं लभते नात्र संशयः ।
योऽर्चयेदह्नि भौमस्य मङ्गलं बहुपुष्पकैः ॥६॥
सर्वा नश्यंति पीडाश्च तस्य ग्रहकृता ध्रुवम् ॥७॥

पूर्वाषाढा नक्षत्र दशमी तिथिको दिन भारद्वाज गोत्र भई अवन्ती देशको भूमिमा जन्मनु भएका ४ हातको शक्ति शूल गदा हातमा लिएको एउटा हातले भक्तजनलाई वर दिइरहेको मेष (भेडा) माथि विराजमान भएको रातो फूलमाला लगाएको श्री मङ्गलदेवले मेरो दुःख हरण गरिदेऊ ।

मङ्गलको तान्त्रिक मन्त्र–

ॐ हुँ श्रीँ भौमाय नमः ॥ वा ॐ अँ अंगारकाय नमः ॥

वैदिक मन्त्र–

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम् ।

अपा ६. रेता ६. सिजिन्वति ॥

बुधस्तोत्रम्

ॐ अस्य श्रीबुधषडक्षरमन्त्रस्य ब्रह्मा ऋषिः पङ्क्तिश्छन्दः श्रीबुधो देवता मम बुधग्रहानुकूल्यप्राप्तिपूर्वकाभीष्टैश्वर्यादि सिद्ध्यर्थे जपे विनियोगः । ब्रह्मणे ऋषये नमः–शिरसि । पङ्क्त्यै छन्दसे नमः– मुखे। श्रीबुधाय देवतायै नमः– हृदि। बाँ– अङ्गुष्ठाभ्यां नमः । बीँ –तर्जनीभ्यां नमः । बूँ– मध्यमाभ्यां नमः । बैँ– अनामिकाभ्यां नमः ॥ बौँ– कनिष्ठिकाभ्यां

नमः। बः- करतलकरपृष्ठाभ्यां नमः। बाँ- हृदयाय नमः। बीँ- शिरसे साहा। बूँ- शिखायै वषट्। बँ- कवचाय हुम्। बौँ- नेत्रत्राय वौषट्। बः- अस्त्राय फट्।

श्रीगणेशाय नमः ॥

बुधो बुद्धिमतां श्रेष्ठो बुद्धिदाता धनप्रदः।
प्रियंगुकलिकाश्यामः कञ्जनेत्रो मनोहरः ॥१॥
ग्रहोपमो रौहिणेयो नक्षत्रेशो दयाकरः।
विरुद्धकार्यहान्ता च सौम्यो बुद्धिविवर्धनः ॥२॥
चन्दात्मजो विष्णुरूपी ज्ञानी ज्ञो ज्ञानिनायकः ॥
ग्रहपीडाहरो दारपुत्रधान्यपशुप्रदः ॥३॥
लोकप्रियः सौम्यमूर्तिर्गुणदो गुणिवत्सलः।
पञ्चविंशति नामानि बुधस्यैतानि यः पठेत् ॥४॥
स्मृत्वा बुधं सदा तस्य पीडा सर्वा विनश्यति।
तद्दिने वा पठेद्यस्तु लभते स मनोगतम् ॥ ५ ॥

धनिष्ठा नक्षत्र द्वादशी तिथिका दिन मगध देशको कूलमा वैश्य जातीमा जन्मनु भएका ४ हात भएका खड्ग चर्म गदा लिई सिंहमाथि विराजमान भएका पपहेलो फूलको माला लगाएका भक्तजनलाई वर दिने भएका पश्री बुधदेवले मेरो सबै दुःख हरण गरि दिनुहोस्।

बुधको तान्त्रिक मन्त्र–

ॐ ऐं ह्रीं श्रीं बुधाय नमः ॥ वा ॐ बुं बुधाय नमः ॥

वैदिक मन्त्र–

ॐ उद्बुद्ध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसᳬ. सृजेथामयञ्च ॥ अस्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत ॥

बृहस्पतिस्तोत्रम्

ॐ अस्य श्री बृहस्पत्याष्टारक्षरमन्त्रस्य ब्रह्मा ऋषिरनुष्टुप्छन्दः श्रीबृहस्पतिर्देवता मम बृहस्पतिग्रहानुकूल्यप्राप्ति र्वकाभीष्टैश्वर्यादिसिद्ध्यर्थे जपे विनियोगः । ब्रह्मणे ऋषिये नमः– शिरसि । अनुष्टुप्छन्दसे नमः– मुखे । श्रीबृहस्पति देवतायै नमः– हृदि । वां– अङ्गुष्ठाभ्यां नम । वीं– तर्जनीभ्यां नमः । वूं– मध्यमाभ्यां नमः । वैं– अनामिकाभ्यां नमः । वौं– कनिष्ठिकाभ्यां नमः । वः– करतलकरपृष्ठाभ्यां नमः । वाँ– हृदयायनमः । वीँ– शिरसे स्वाहा । वूँ– शिखायै वषट् । वैँ– कवचाय हुम् । वाँ– नेत्रत्रयाय वौषट् । वः– अस्त्राय फट् ।

श्रीगणेशाय नमः ॥

गुरुर्बृहस्पतिर्जीवः सुराचार्यो विदां वरः ।
वागीशो धिषणे दीर्घश्मश्रुः पीताम्बरो युवा ॥१॥
सुधादुष्टिर्ग्रहाधीशो ग्रहपीडापहारकः ।
दयाकरः सौम्यमूर्तिः सुराच्र्य कुंकुमद्युतिः ॥२॥
लोकपूत्यो लोकगुरुर्नीतिज्ञो नीतिकारकः ।
तारापतिश्चांङ्गिरसो वेदवेद्यः पितामहः ॥३॥
भक्त्या बृहस्पतिं स्मृत्वा नामान्येतानि यः पठेत् ।
अरोगी बलवान् श्रीमान्पुत्रवान्स भवेन्नरः ॥४॥
जीवेद्वर्षशतं मर्त्यो पापं नश्यति नश्यति ।
यः पूजयेद् गुरुदिने पीतगन्धाक्षताम्बरैः ॥५॥
पुष्पदीपोपहारैश्च पूजयित्वा बृहस्पतिम् ।
ब्राह्मणान्भोजयित्वा च पीडाशान्तिर्भवेद्गुरोः ॥६॥

फाल्गुन महिनाको एकादशी तिथि सिन्धु देशान्तरभित्र ब्रह्माकुलमा जन्मनु भएका पहेलो वर्ण भएका ४ हात भएका डण्डि कमण्डलु रुद्राक्षमाला दिई वर (आशिर्वाद) दिइरहेका देवता तथा ऋषिगणको गरु भई तीनै लोकका प्राणिको रक्षा गरी हाथीमाथि राजगर्नु भएका गरुदेवले मेरो दुःख हरण गरिदिनुहोस् ।

बृहस्पतिको तान्त्रिक मन्त्र–

ॐ ऐं क्लीं बृहस्पतये नमः ॥ वा ॐ बृँ बृहस्पतये नमः ॥

वैदिक मन्त्र–

ॐ बृहस्पतेऽअतियदर्योऽअर्हाद्युमद्विभाति क्क्रतुमज्जनेषु ।
यद्दीदयच्छ्वसऽऋतप्रजात तदस्मासुद्द्रविणन्धेहि चित्रम् ॥
उपयामगृहीतोसि बृहस्पतये त्वैषते योनिर्बृहस्पतयेत्वा ॥

शुक्रस्तोत्रम्

ॐ अस्य श्रीशुक्रैकादशाक्षरमन्त्रस्य ब्रह्मा ऋषिर्विराट् छन्दः श्रीशुक्रो देवता मम शुक्रग्रहानुकूल्यप्राप्तिपूर्वका–भीष्टैश्वर्यादिसिद्ध्यर्थे जपे विनियोगः । ब्रह्मणे ऋषये नमः– शिरसि । विराजे छन्दसे नमः– मुखे। श्रीशुक्राय देवतायै नमः– हृदि। शुँ– अङ्गुष्ठाभ्यां नमः । वस्त्रं– मध्यमाभ्यां नमः । मे– अनामिकाभ्यांनमः । देहि– कनिष्ठकाभ्यां नमः । नमः– करतलकरपृष्ठाभ्यां नमः । शुँ– हृदयाय नमः । शुक्राय– शिर से स्वाहा। वस्त्रं– शिखायै वषट् । मे– कवचाय हुम् । देहि– नेत्रत्रायाय वौषट्। नमः– अस्त्राय फट्।

श्रीगणेशाय नमः ॥

शुक्रः काव्यः शुक्ररेताः शुक्लाम्बरधरः सुधीः ।
हिमाभः कुन्तधवलः शुभ्रांशुः शुक्लभूषणः ॥१॥
नीतिज्ञो नीतिकृन्नीतिमार्गगामी ग्रहाधिपः ।
उशना वेदवेदाङ्गपारगः कविरात्मवित् ॥२॥
भार्गवः करुणासिन्धुः ज्ञानगम्यः सुतप्रदः ।
शुक्रस्यैतानि नामानि शुक्रं स्मृत्वा तु यः पठेत् ॥३॥
आयुर्धनं सुखं पुत्रं लक्ष्मीं वसतिमुत्तमाम् ॥
विद्यां चैव स्वयं तस्मै शुक्रस्तुष्टो ददाति च ॥ ४ ॥

पुण्य नवमी तिथि भोजकट देशमा ब्राह्मण कूलमा जन्मनु भएका ३ हातमा डण्डि, कमण्डलु, रुद्राक्षमाला लिई १ हातले वर प्रदान गरी सेतो वर्ण भएका घोडामा राज भएका देवता र दैत्यगणका पनि गुरु भएका हे शुक्रदेवता मेरो दुःख हरण गरिदिनुहोस् ।

शुक्रको तान्त्रिक मन्त्र–

ॐ ह्रीँ श्रीं शुक्राय नमः ॥ वा ॐ शुँ शुक्राय नमः ॥

वैदिक मन्त्र–

ॐ अन्नात्परिस्रुतोरसम्ब्रह्मणा व्यपिवत्क्षत्रम्पयः सोमम्प्रजापतिः ॥

ऋतेन सत्यमिन्द्रियं व्विपान ६.शुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥

शनैश्चरस्तोत्रम्

ॐ अस्य श्रीशनैश्चराष्ट्यक्षरमन्त्रस्य ब्रह्मा ऋषिर्गायत्री छन्दः श्रीशनैश्चरो देवता मम शनैश्चरानुकूल्य-प्राप्तिपूर्वकाभीष्टैश्वर्यादिसिद्ध्यर्थे जपे विनियोगः। ब्रह्मणे ऋषये नमः- शिरसि। गायत्र्यै छन्दसे नमः- मुखे। श्रीशनैश्चराय देवतायै नमः- हृदि। शाँ- अङ्गुष्ठाभ्यां नमः। शीँ- तर्जनीभ्यां नमः। शूँ- मध्यमाभ्यां नमः। शैँ- अनामिकाभ्यां नमः। शौँ- कनिष्ठिकाभ्यां नमः। सः- करतलकरपृष्ठाभ्यां नमः। शाँ- हृदयाय नमः। शीँ- शिरसे स्वाहा। शुँ- शिखायै वौषट्। शैँ- कवचाय हूम्। शौँ- नेत्रत्रयाय वौषट्। शः- अस्त्राय फट्।

श्रीगणेशाय नमः ॥

अस्य श्रीशनैश्चरस्तोत्रस्य दशरथ ऋषि।
श्रीशनैश्चरो देवता। त्रिष्टुप्छन्दः।
शनैश्चरप्रीत्यर्थे जपे विनियोगः ॥

दशरथ उवाच ॥

कोणोऽन्तको रौद्रयमोऽथ बभ्रुः कृष्णः शनिः पिङ्गलमन्दसौरिः।
नित्यं स्मृतो यो हरते च पीडां तस्मै नमः श्रीरविनन्दनाय ॥१॥

सुरासुराः किंपुरुषो रगेन्द्रा गन्धर्वविद्याधरपन्नगाश्च ।
पीड्यन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय ॥२॥
नरानरेन्द्रा पशवो मृगेन्द्रा वन्याश्च ये कीटपतङ्गभृङ्ग ॥
ऊड्यन्ति सर्वे बिषमश्थितेन तस्मै नम श्रीरविनन्दाय ॥३॥
देशाश्च दुर्गाणि वनानि यत्र सेनानिवेशाः पुरपत्तनानि ।
पीड्यन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय ॥४॥
तिलैर्यवैर्माषगुडान्नदानै र्लोहेन नीलाम्बरदानतो वा ।
प्रीणाति मन्त्रैर्निजवासरे च तस्मै नमः श्रीरविनन्दनाय ॥५॥
प्रयागकूले यमुनातटे च सरस्वतीपुण्यजले गुहायाम् ।
यो योगिनां ध्यानगतोऽपि सूक्ष्मस्तस्मै नमः श्रीरविनन्दनाय ॥६॥
अन्यप्रदेशात्स्वगृहं प्रविष्टस्तदीयवारे स नरः सुखी स्यात् ।
गृहाद्गतो यो न पुनः प्रयाति तस्मै नमः श्रीरविनन्दनाय ॥७॥
स्रष्य स्वयंभूर्भुवनत्रयस्य त्राता हरीशो र्हर्ता पिनाकी ।
एकस्त्रिधा ऋग्यजुः साममूर्तितस्मै नमः श्रीरविनन्दनाय ॥८॥
शन्यष्टकं यः प्रयतः प्रभाते नित्यं सुपुत्रैः पशुबान्धवैश्च ।
पठेत्तु सौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाणपदं तदन्ते ॥९॥
कोणस्थः पिंगलो बभ्रूः कृष्णो रौद्रोऽन्तको यमः ।
सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः ॥१० ॥
एतानि दश नामानि प्रातरुत्थाय यः पठेत् ।
शनैश्चरकृता पीडा न कदाचिद्भविष्यति ॥ ११ ॥

अष्टमी तिथि रोहिणी नक्षत्रमा सौराष्ट्रदेशको काश्यप कूलमा जन्मनु भएका यमराजको अधिकार लिएका शूद्र जात भएको ४ ओटा हात भएका बाण, त्रिशूल लिएको गिद्धमा विराजमान भएको नीलो आँखा भएको हे शनि देवता मेरो दुःख । हरण गरिदिनुहोस् ।

शनैश्चरको तान्त्रिक मन्त्र–

ॐ ह्रीं श्रीं शनैश्चराय नमः ॥ वा ॐ शँ शनैश्चरायनमः ॥

वैदिक मन्त्र–

ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥

शँय्योरभिस्रवन्तु नः ॥

पिप्पल वृक्षस्तोत्रम्

शनैश्चर अनिष्टफल निवारणनिमित्त पिप्पल वृक्षको प्रार्थना स्तोत्र–

अश्वत्थ यस्मिन् त्वयिवृक्षराजे

अतः श्रुतस्त्वं सततं तरूणां

नारायणस्तिष्ठति सर्वकाले ॥

धन्योसि चारिष्टविनाशकोसि ॥

य इदं पठते भक्त्या नरोऽश्वत्थस्य सन्निधौ ।

तारकाग्रहदोषाणां शीघ्रमेव विनश्यति॥

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे॥

अग्रतः शिवरूपाय वृक्षराजाय ते नमः॥

पिप्पल नाम भएको हे वृक्षराज मूज (जरा) मा ब्रह्माले, मध्यभागमा विष्णु भगवान्ले, माथिल्लो भागमा शिवले राजगरेका तारा (नक्षत्र) आदि सबै ग्रह तथा शनेश्चरबाट भएको सबै दुःख चाँडै नाश गरि देऊ।

राहुस्तोत्रम्

ॐ अस्य श्रीराहुषडक्षरमन्त्रस्य ब्रह्मा ऋषिः पङ्क्तिश्छन्दः श्रीराहुर्देवता मम राहुग्रहानुकूल्यप्राप्तिपूर्वकाभीष्टैश्वर्यादिसिद्ध्यर्थे जपे विनियोगः। ब्रह्मणे ऋषये नमः- शिरसि। पङ्क्त्यै छन्दसे नमः- मुखे। श्रीराहवे देवतायै नमः- हृदि। राँ- अङ्गुष्ठाभ्यां नमः। रीँ- तर्जनीभ्यां नमः। रूँ- मध्यमाभ्यां नमः। रैँ- अनामिकाभ्यां नमः। रौँ- कनिष्ठिकाभ्यां नमः। रः- करतलकरपृष्ठाभ्यां नमः। राँ- हृदयाय नमः। रीँ- शिरसे स्वाहा। रूँ- शिखायै वषट्। रैँ- कवचाय हुम्। रौँ- नेत्रत्रयाय वौषट्। रः- अस्त्राय फट्॥

श्रीगणेशाय नमः ॥

राहुर्दानवमन्त्री च सिंहिकाचित्तनन्दनः ।
अर्धकायः सदा क्रोधी चन्द्रादित्यविमर्दनः ॥१॥
रौद्रो रुद्रप्रियो दैत्यः स्वर्भानुर्भानुभीतिदः ।
ग्रहराजः सुधापायी राकातिथ्यभिलाषुकः ॥२॥
कालदृष्टिः कालरूपः श्रीकण्ठहृदयाश्रयः ।
विधुंतुदः सैंहिकेयो घोररूपो महाबलः ॥३॥
ग्रहपीडाकरो दंष्ट्री रक्तनेत्रो महोदरः ।
पञ्चविंशति नामानि स्मृत्या राहुं सदा नरः ॥४॥
यः पठेन्महती पीडा तस्य नश्यति केवलम् ।
आरोग्यं पुत्रमतुलां श्रियं धान्यं पशूंस्तथा ॥५॥
ददाति राहुस्तस्मै यः पठते स्तोत्रमुत्तमम् ।
सततं पठते यस्तु जीवेद्वर्षशतं नरः ॥६॥

इति श्री स्कन्दपुराणे राहुस्तोत्रं सम्पूर्णम् ॥

अमावश्यातिथि भरणी नक्षत्रमा पाठीनसी गोत्र अमरदेशमा उत्पत्ति भएको शूद्र जाति ३ कातमा खड्ग, चर्म, त्रिशूल लिई १ हातले वर दिईरहेको आधामात्र शरीर भएको विकराल रूप भएको नीलो सिंहमाथि चढेको हे राहु भगवान् मेरो दुःख हरण गरिदेऊ ।

राहुको तान्त्रिक मन्त्र–

ॐ ऐँ ह्रीँ राहवे नमः ॥ वा ॐ रां राहवे नमः ॥

वैदिक मन्त्र–

ॐ कया नश्चित्रऽआभुवदूती सदावृधः सखा ॥

कया शचिष्ठया व्वृता ॥

केतुस्तोत्रम्

ॐ अस्य श्रीकेतुषडरक्षरमन्त्रस्य ब्रह्मा ऋषिःपङ्क्तिश्छन्दः श्रीकेतुर्देवता मम केतुग्रहानुकूल्यप्राप्तिपूर्वका भीष्टैश्वर्यादिसिद्ध्यर्थे जपे विनियोगः । ब्रह्मणे ऋषये नमः–शिरसि, पङ्क्त्यै छन्दसे नमः–मुखे। श्रीकेतवे देवतायै नमः–हृदि। काँ- अङ्गुष्ठाभ्यां नमः । कीँ- तर्जनीम्यां नमः । कूँ मध्यमाभ्यां नमः । कैँ अनामिकाभ्यां नमः । कौँ कनिष्ठिकाभ्यां नमः । कः करतलकरपृष्ठाभ्यां नमः । काँ- हृदयाय नमः । कीँ- शिरसे स्वाहा । कूँ-शिखायै वषट्। कैँ -कवचाय हुम्। कौँ- नेत्रत्राय बफट्। कः- अस्त्राय फट्॥

श्रीगणेशाय नमः ॥

केतुः कालः कलयिता धूम्रकेतुर्विवर्णकः ।
लोककेतुर्महाकेतुः सर्वकेतुर्भयप्रदः ॥१॥
रौद्रो रुद्रप्रियो रुद्रः क्रुरकर्मा सुगन्धधृक् ।
पलालधूमसंकाशश्चित्रयज्ञोपवीतधृक् ॥२॥
तारागणविमर्दी च जैमिनेयो ग्रहाधिपः ।
पञ्चविंशति नामानि केतोर्यः सततै पठेत् ॥३॥
तस्य नश्यन्ति बाधाच सर्वाः केतुप्रसादतः ।
धनधान्यपशूनां च भवेद् वृद्धिर्न संशयः ॥४॥

अमावश्य तिथि अश्लेषा नक्षत्रमा कुशपर्वत देशमा जैमिनीको गौत्रमा उत्पन्न भएका चित्रगुप्तको अधिकार पाएका शूद्रजाति भएका धूम्रवर्ण भएका २ हातले वर प्रदान गरि गिद्धमाथि विराजमान भएका हे केतु देवता मेरो दुःख हरण गरिदेऊ ।

केतुको तान्त्रिक मन्त्र–

ॐ ऐं ह्रीं केतवे नमः ॥ वा ॐ कें केतवे नमः ॥

वैदिक मन्त्र–

ॐ केतु कृण्वन्नकेतवे पेशोमर्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥

अष्टयोगिनीस्तोत्रम्

मङ्गलास्तोत्रम्

श्रीपार्वत्युवाच

देवदेव महादेव सृष्टिस्थित्यन्तकारक ।
मङ्गलायाश्चन्द्रमातुः स्तवनं ब्रू हि शङ्कर ॥

श्री शिव उवाच

शृणु देवि प्रवक्षामि मङ्गलायाः स्तवं शुभम् ।
ग्रहशान्तिकरं दिव्यं यदुक्तं सिद्धसावरे ॥
मङ्गला मङ्गलाचारा मङ्गलोदयकारिणी ।
चन्द्रप्रसादजननी चन्द्रमाता कृशोदरी ॥
चन्द्रमण्डलमध्यस्था चन्द्रायुतसमप्रभा ।
शीलता श्वेतवर्णा च श्वेताम्बरविधारिणी ॥
वराभयकरा शान्ता स्मितास्या पद्मलोचना ॥
त्रिनेत्रा च स्वयंभूता श्वेतपर्वतवासिनी ॥
दशाशान्तिकरी रम्या गोभूस्वर्णादिदायिनी ।
सामान्यान्तर्दशारूपा पञ्चत्रिंशद्विभेदतः ॥
एतानि शुभनामानि पठेत् प्रातः समुत्थितः ।

चक्रजन्यं दशाजन्यं पीडा तस्य विनश्यति ॥

मङ्गलायाः प्रसादेन सर्वं भवति शोभनम् ।

इति सिद्धसाबरन्तन्त्रे मङ्गलास्तवं सम्पूर्णम् ।

मङ्गलाको तान्त्रिक मन्त्र–

ॐ ह्रीं मङ्गले मङ्गलायै नमः ॥

पिङ्गलास्तोत्रम्

स्कन्द उवाच

उत्तमाधममध्यानां प्राणिनां राज्यदायकाः ।

सर्वस्वहारकाश्चैव तथा पञ्चत्वदायकाः ॥

ग्रहा लोके प्रसिद्धाश्चयेऽधीना योगिनीमुखाः ।

तस्मात् प्रब्रू हि मे देव पिङ्गलाया स्तवं शुभम् ॥

मार्तण्डप्रीतिजनकं पीडाशान्तिविधायकम् ।

श्री शिव उवाच

शृणु षण्मुख तत्वेन कथ्यमानं मयाऽनघ ॥

पिङ्गला सूर्यजननी जनसंमोहकारिणी ।

वराभयधरा सौम्या त्रिनेत्रा कञ्जलोचना ॥

कुसुम्भबर्णा रक्ताक्षी सूर्यविम्बनिवासिनी ।
ग्रहपीडापहरणी रक्तपद्माटबीरता ॥
रक्ताम्बरा रक्तमाल्या रक्तचन्दनचर्चिता ।
विल्वस्तनी बिशालाक्षी मधुपानरता सदा ॥
मधुप्रिया दशारूपा दशाधीशा ग्रहेश्वरी ।
मारकेशी महानन्दा परिपाकफलप्रदा ॥
पिङ्गलायास्तवंह्येतत् महाशान्तिविधायकम् ।
ग्रहपीडापहरणं पठनात् सर्वकामदम् ॥
यस्य संस्मरणादेव निहतस्तारको मया ।
विषेषतः कलियुगे प्रधाना योगिनीगणाः ॥
कृशरान्नैर्वाडवाँश्च कन्यकाँस्तर्पयेद् बुधः ।
पठेत् स्तोत्रं महेशान्याः पीडाशान्तिर्भविष्यति ॥
आयुरारोग्यमाप्नोति वित्तञ्च लभते बहु ।

इति श्री रुद्रयामल शिवकुमारसंवादे तेजस्विनीकल्पे पिङ्गलास्तवं सम्पूर्णम् ।

पिङ्गलाको तान्त्रिक मन्त्र—

ॐ ग्लौं पिङ्गले वैरकारिणि प्रसीद फट् नमः ॥

धान्यास्तोत्रम्

मणिग्रीव उवाच

सनातनमुने सम्यक् शत्रुगेहस्थितस्य च ।
सुराचार्यदशायाश्च वद शान्तिविधिं क्वचित् ॥

सनातनमुनिरुवाच

ग्रहाः मातृगणाधीना विज्ञेया विबुधर्षभैः ।
तस्माच्छृणु त्वंवक्ष्यामि धान्यास्तोत्र धनप्रदम् ॥
धान्या धनप्रदा धान्यराशिस्था धान्यरूपिणी ॥
धनदा धनरूपा च गुरोर्माता गुणेश्वरी ॥
आचार्याणी कुलेशानी दशाचक्रनिवासिनी ।
द्विभुजा धर्मरूपा च वराभयविधारिणी ॥
तप्तकाञ्चनवर्णा च त्र्यक्षा पीतम्बरावृता ।
महाजनैश्चाञ्जलिपुटैर्मुक्तैर्लाजैः प्रपूरिता ॥
दशाचक्रगता देवी मोदिनी वीरनायिका ।
वृन्दारकसमूहैश्च वन्दिता भुवनेश्वरी ॥
इति धान्यास्तवं दिव्यं पठेन्नित्यमनन्यधी ।
तस्य नश्यन्ति गुरुजा पीडा योगिनिसम्भवाः ॥

पुत्रं पौत्रं धनं धान्यं लभते च न संशयः ।
वातपित्तादिजा पीडा नश्यते पाठमात्रतः ॥
ग्रहभूतपिशाचाश्च डाकिनीशाकिनीगणाः ।
ब्रह्मराक्षसवेताला नागगन्धर्वमातरः ॥
छायां तस्य न लङ्घन्ति का वार्ताग्रहणस्यतु ।

इति श्रीस्कन्दपुराणे रेबाखण्डे धान्यास्तोत्रं सम्पूर्णम् ।

धान्याको तान्त्रिक मन्त्र–

ॐ श्रीं धनदे धान्ये नमः ॥

भ्रामरीस्तोत्रम्

श्रीभूरुवाच

कथं भ्रामरिजा पीडा नश्यते स्मृतिमात्रतः ।
भरद्वाजमुने ब्रू हि यदि तेऽनुग्रहो महि ॥

भरद्वाज उवाच

कुमारीणां पूजनैश्च तथा ब्राह्मणतर्पणैः ।
हवनैश्च सिताज्यादिदानैः सक्षौद्रकीटजैः ॥
अकिञ्चनानां मर्त्यानां जपैश्चैव विशेषतः ।

सर्वेषां स्तोत्रपठनाद् दुष्टदोषो विनश्यति ॥
चत्वारिंशतिभेदेन अन्तर्व्यन्तरजा दशा ।
सूचिता मङ्गलेनाऽथ दुष्टदोषो गमिष्यति ॥
तस्माच्छान्तिकरं स्तोत्रं शृणु सर्वाङ्गसुन्दरि ।
द्विभुजा भ्रामरी श्यामा वरखट्वाङ्गधारिणी ॥
भ्रममाणा दशामध्ये विद्रुमाभा त्रिलोचना ।
रक्ताम्बरा रक्तवर्णा रक्तमाल्यानुलेपना ॥
रक्तनेत्रनखा रक्तरसना रक्तदन्तिका ।
भ्रमहन्त्री भक्तिलभ्या मनसोद्वेगकारिणी ॥
योगिनीवृन्दमध्यस्था भौममाता यशस्विनी ।
भयदा भयहा दुर्गाष्टवीभ्रमणदायिनी ॥
द्विसहस्रविभेदेन ज्योतिश्चक्रनिवासिनी ।
कालिका कामदा काली कमनीयभुजेक्षणा ।
कान्तारवासिनी कान्ता घृतोदधिनिवासिनी ।
माक्षीकोदधिसंमग्ना यवपर्वतगामिनी ॥
शर्करागिरिसँल्लीना कृशरान्नबिभोजिनी ।
खेटा खेटानुगा साध्वी खेटपीडाविभञ्जनी ॥

इति ते कथितं स्तोत्रं सर्वसिद्धिप्रवर्तकम् ।
यस्याऽनुष्ठानमात्रेण नश्यते खेटजं भयम् ॥
योगिनीजं दशादोषं नश्यतेऽत्र न संशयः ।
सत्यं सत्यं पुनः सत्यं न मिथ्यावादिनो वयम् ॥

इति सूतसंहितायां भूमिभरद्वाजसंवादे भ्रामरीस्तोत्रं सम्पूर्णम् ।

भ्रामरीको तान्त्रिक मन्त्र–

ॐ श्रीं भ्रामरी जगतामधीश्वरी भ्रामरी क्लीँ नमः ॥

भद्रिकास्तोत्रम्

स्कन्द उवाच

भद्रायाः स्तवनं ब्रू हि यत् त्वया सूत्रितं पूरा ।

शिव उवाच

नारसिंहे महायुद्धे मया शरभरूपिणा ॥
स्तुता सा भद्रिकादेवी प्रादुर्भूता मितप्रभा ।
स्तोत्रं तच्चाऽत्र वक्ष्यामि श्रृणु त्वं नीलकण्ठज ॥
भद्रिका भद्रदा भद्रा भवरोगविदारिणी ॥
भक्तिप्रिया भक्तिगम्या द्विभुजोत्पलधारिणी ॥

बुधस्य जननी बोधा बुधरूपा पतिव्रता ।
भार्गवी लोकजननी भक्ताभीष्टफलप्रदा ।
भाविनी भवरोगघ्नी भुवनेश्वरपूजिता ॥
भारती भरतेशाना ग्रहमाता हरेश्वरी ।
दशारूपाऽन्तरदशारूपा व्यन्तररूपिणी ।
प्राणान्तरस्वरूपा च मातृकाचक्ररूपिणी ॥
संग्रामे जयदा काली सर्वत्र सुखदायिनी ।
इति स्तुता महादेवी मया शरभरूपिणी ॥
वरं दत्वा गता साऽपि भद्रिका भद्रदायिनी ।
तस्याः प्रसादतः प्राप्तं संग्रामे जयमुत्तमम् ॥
इदं मया कृत स्तोत्रं ये पठिष्यन्ति मानवाः ।
तेषां तु ग्रहजाः पीडास्तथा मातृसमुद्भवाः ॥
दशाश्चान्तर्दशाजन्या लग्नगोचरवर्षजाः ।
विनश्यन्ति महासेन सत्यं सत्यं न संशयः ॥

इति ब्रह्मायामले ब्रह्मवृक्षकल्पप्रसङ्गे शरभनृसिंहयुद्धे शरभकृतभद्रिकास्तोत्रं सम्पूर्णम् ।

भद्रिकाको तान्त्रिक मन्त्र–

ॐ भद्रिके भद्रं देहि अभद्रं नाशय नमः ॥

उल्कास्तोत्रम्

वशिष्ठ उवाच

कथं दुःखे निमग्नोऽसि किमर्थं मलिनं मुखम् ।
ममाऽग्रे कथ्यतां दुःखमुपायं वच्मि साम्प्रतम् ॥

हरिश्चन्द्र उवाच

राज्यभ्रंशो महान् जातो धननाशादिकं ततः ।
पत्न्यादीनां कथं लाभो युक्ति पूर्ण वद प्रभो ॥

वशिष्ठ उवाच

शृणु राजन् प्रवक्ष्यामि उल्कास्तोत्रं विपद्धरम् ।
रोगशोकादिहरणं सर्वसौभाग्यवर्धनम् ॥
धारणं कुरु भो शिष्य उल्कादेव्याः प्रपूजनम् ।
स्तोत्रं च पठ्यतां वत्स विपतिं नाशयत्ययम् ॥
ॐ अस्य श्री उल्कादेव्याः स्तोत्रमन्त्रस्य इत्यपि ।
ऋषी रुद्रः समाख्यातः वृहतीछन्द उच्यते ॥
उल्कादेवीबीजं अं च ह्रीं शक्तिः क्रीं च कीलकम् ।
ममाधिदुःखशान्त्यर्थं विनियोगः प्रकीर्तितः ॥
अँ मम रोगं नाशय भञ्जय मूलमन्त्रोऽयम् ।

उल्कादेवी महारोगी अविशूक्तविनाशिनी ॥
मन्दमाता विशालाक्षी योगिनीगणचारिणी ।
तारिणी सर्वदुःखानां नाशिनी रिपुघातिनी ॥
ज्ञानदात्री मोक्षकरी सिद्धिदा सौख्यदा तथा ।
दुष्टहन्त्री महामाया सर्वारिष्टप्रणाशिनी ॥
भवदुःखहरी सौम्या दुष्टग्रहविमर्दिनी ।
छायारूपधरी पूर्णा पद्मा पद्मावती शिवा ॥
बडबारूपिणी गुह्या गुह्या शक्तिः पराऽपरा ।
वागीश्वरी वरा भद्रा भवानी भूतनाशिनी ॥
भूतिदा रोगहन्त्री च अङ्कारबीजरूपिणी ॥
अपर्णा गिरजा काली श्मशानालयवासिनी ॥
शिवप्रिया महाचण्डी चण्डेश्वरसुपूजिता ।
इत्येतत्परमं गुह्यं उल्कादेव्याः स्तवं शिवम् ॥
आधिव्याधिहरं पुण्यं त्रिषु लोकेषु दुर्लभम् ।
अभक्ताय निन्दकाय क्रूराय भेषधारिणे ॥
जपालस्याय नो दद्यात् सर्वस्वसम्प्रदायिने ।

गुरुभक्ताय शान्ताय देशभक्तिपराय च ॥

देयं च स्तोत्रराजञ्च सत्यं सत्यं न संशयः ।

इति श्रीमेरुआगमे कैलाशखण्डे उल्कादेव्याः स्तोत्रं सम्पूर्णम् ।

उल्काको तान्त्रिक मन्त्र–

ॐ उल्के मम रोगं नाशय जम्भय नमः ॥

सिद्धास्तोत्रम्

श्रीसूर्य उवाच

शृणु साम्ब महावाहो सिद्धास्तोत्रमनुत्तमम् ।

विरुद्धस्याऽसुरगुरोः पीडाशान्तिविधायकम् ॥

योगिनीसिद्धिदा सिद्धा मन्त्रसिद्धिस्वरूपिणी ।

तपसः सिद्धिरूपा च दयारूपा क्षमान्विता ॥

ऋद्धिरूपा शान्तिरूपा मेधारूपा तपस्विनी ।

पद्महस्ता पद्मनेत्रा शुक्रमाता महेश्वरी ॥

वस्त्रदा धनदात्री च राज्यदा सुखरूपिणी ।

शारदा च रमा काली प्रज्ञासागररूपिणी ॥

सिद्धेश्वरी सिद्धिविद्या सिद्धिलक्ष्मीर्मतङ्गजा ।
शुक्लवर्णा स्वेतवस्त्रा श्वेतमाल्यानुलेपना ॥
श्वेतपर्वतसंकाशा सुश्वेतस्तनमण्डला ।
कर्पूरराशिमध्यस्था चन्द्रमण्डलवासिनी ॥
कृशरान्नप्रिया साध्वी त्रिमधुस्था प्रियंवदा ।
कन्याशरीरगा रामा विप्रदेहविचारिणी ॥
चित्रानहस्ता सुभगा परमान्नप्रिया तथा ।
दशास्वरूपा नक्षत्ररूपाऽन्तर्यामिरूपिणी ॥
इति ते कथितं वत्स सिद्धास्तोत्रमनुत्तमम् ।
पठनात् पाठनाद्वाऽपि गोसहस्रफलं लभेत् ॥
ग्रहजन्यं दशाजन्यं चक्रजं भूतसम्भवम् ।
पिशाचोरगगन्धर्वपूतनामातृसम्भवम् ॥
दोषं विनाशमायाति सत्यं सत्यं न संशयः ।
इति श्रीसाम्वपुराणे सिद्धास्तोत्रम् ।

सिद्धाको तान्त्रिक मन्त्र–

ॐ ह्रीँ सिद्धे मे सर्व मानसं साधय नमः ॥

सङ्कटास्तोत्रम्

नारद उवाच

जैगीषव्य मुनिश्रेष्ठ सर्वज्ञ सुखदायक ।
आख्यातानि सुपुण्यानि श्रुतानि त्वत्प्रसादतः ॥१॥
न तृप्तिमधिगच्छामि तव वागमृतेन च ।
वदस्वैकं महाभाग सङ्कटाख्यानमुत्तमम् ॥२॥
इति तस्य वचः श्रुत्वा जैगीषव्योऽब्रबीत् ततः ।
सङ्कष्टनाशनं स्तोत्रम् शृणु देवर्षिसत्तम ॥३॥
द्वापरे तु पुरा वृते भ्रष्टराज्यो युधिष्ठिरः ।
भ्रातृभिः सहितो राज्यनिर्वेदं परमम् गतः ॥४॥
तदानीं तु ततः काशीं पुरीं यातो महामुनिः ।
मार्कण्डेय इति ख्यातः सह शिष्यैर्महायशा ॥५॥
तं दृष्ट्वा तु समुत्थाय प्रणिपत्य सुपूजितः ।
किमर्थं म्लानवदन एतत् त्वं मां निवेदय ॥६॥

युधिष्ठर उवाच

सङ्कष्टं ने महत् प्राप्तमेतादृग्वदनं ततः ।
एतन्निवारणोपायं किञ्चिद् ब्रू हि मुने मम ॥७॥

मार्कण्डेय उवाच

आनन्दकानने देवी सङ्कटा नाम विश्रुता ।
वीरेश्वरोत्तमे भागे पूर्वं चन्द्रेश्वरस्य च ॥८॥
शृणु नामाष्टकं तस्याः सर्वसिद्धिकरं नृणाम् ।
सङ्कटा प्रथमं नाम द्वितीयं विजया तथा ॥९॥
तृतीयं कामदा प्रोक्तं चतुर्थं दुःखहारिणी ।
शर्वाणी पञ्चमं नाम षष्टं कात्यायनी तथा ॥१०॥
सप्तमं भीमनयना सर्वरोगहराऽष्टमम् ।
नामाष्टकमिदं पुण्यं त्रिसन्ध्यं श्रद्धयाऽन्वितः ॥११॥
यः पठेत् पाठयेद् वाऽपि नरो मुच्येत सङ्कटात् ।
इत्युक्त्वा तु नरश्रेष्ठमृषिर्वाराणसीं ययौ ॥१२॥
इति तस्य वचः श्रुत्वा नारदो हर्षनिर्भरः ।
ततः संपूज्य तां देवीं वीरेश्वरसमन्विताम् ॥१३॥
भुजैस्तु दशभिर्युक्तां लोचनत्रयभूषिताम् ।
मालाकमण्डलुयुतां पद्मशङ्खगदायुताम् ॥१४॥
त्रिशूलडमरुधरां खड्गचर्मविभूषिताम् ।
वरदाभयहस्तां तां प्रणम्य विधिनन्दनः ॥१५॥

वारत्रयं गृहीत्वा तु ततो विष्णुपुरं ययौ।
एतत्स्तोत्रस्य पठनं पुत्रपौत्रविवर्धनम् ॥१६॥
सङ्कष्टनाशनं चैव त्रिषु लोकेषु विश्रुतम्।
गोपनीयं प्रयत्नेन महावन्ध्याप्रसूतिकृत् ॥
इति श्रीपद्मपुराणे सङ्कटाष्टकं सम्पूर्णम्।

सङ्कटाको तान्त्रिक मन्त्र–

ॐ ह्रीँ शंकटे मम रोगं नाशय नमः ॥

अथमुन्थास्तोत्रम्

कैलाशशिखरासीनं देवदेवं जगद्गुरुम्।
पार्वती प्रणता भूत्वा वचनं समभाषत ॥ १ ॥
श्रीपार्वत्युवाच।
भगवन् सर्वधर्मज्ञ सर्वशत्रुविमर्दन ॥
यस्मिन वर्षे व्याधिभयं मुन्थहा कुरुते यदि ॥ २ ॥
केनोपायेन शान्तिः स्यात् तद् वदस्व सुरेश्वर ॥

श्रीमहादेव उवाच ॥

अस्तीदं मुन्थहा देव्याश्चाष्टकं नाम सिद्धिदम् ॥ ३ ॥
यस्य विज्ञान मात्रेण वहवो निर्भयङ्गताः ॥

मुन्थहा प्रथमं नाम द्वितीयं कीर्ति वर्धिनी ॥ ४ ॥

तृतीयं देवजननी चतुर्थं माधव प्रिया ॥।

पञ्चमं भयहंन्त्री च षष्ठं विश्वेश्वरी तथा ॥ ५ ॥

सप्तमं कलुषघ्नी च वरदा चाष्टमं तथा ॥

इत्येतैर्नामभिर्देवी प्रत्यहं पूजिता यदि ॥ ६ ॥

तस्य पीडाभयं नास्ति सत्यं सत्यं वदाम्यहम् ॥

तज्ज्ञात्वा निर्जरैर्देबैः सर्वे दानवराक्षसा ॥ ७ ॥

निहताः समरे देवि तस्मान्मुन्थां सदा जपेत् ॥

राज्यदां भोग्यदां श्रीदां पुत्रदां कीर्तिदां तथा ॥ ८ ॥

नामान्येतानि मुन्थाया पठेन्नित्यं महेश्वरि ।

इत्युत्तर गन्धर्व तन्त्रे मुन्थहास्तोत्रं सम्पूर्णम् ॥

तान्त्रिक मन्त्र–

ॐ भगवती मुन्थे कष्टं मथ मथ ॐ ह्रीँ

नोटः यदि ग्रह दशा शान्ति गर्न जप गर्ने हो भने मन्त्रको अन्त्यमा नमः भन्ने ॥ होम गरेर शान्ति गर्ने हो भने मन्त्रको अन्त्यमा स्वाहा भन्नु पर्दछ ।

श्री वगलामुखी कवचम्

श्रुत्वा च बगलापूजां स्तोत्रं चापि महेश्वर ॥
इदानीं श्रोतुमिच्छामि कवचं वद मे प्रभो ॥१॥
वैरिनाशकरं दिव्यं सर्वाऽशुभविनाशनम् ॥
शुभदं स्मरणात्पुण्यं त्राहि मां दुःखनाशनम् ॥२॥

श्री भैरव उवाच ॥

कवचं सृणु वक्ष्यामिभैरवीप्राणवल्लभम् ॥
पठित्वा धारयित्वा तु त्रैलोक्ये विजयी भवेत् ॥३॥
ॐ अस्यश्री बगलामुखीकवचस्य नारद ऋषिः ।
अनुष्टुप्छन्दः । श्रीबगलामुखी देवता । लं बीजम् ।
ऐं कीलकम् । पुरुषार्थचतुष्टयसिद्धये जपे विनियोगः ॥
ॐ शिरो मे बगला पातु हृदयैकाक्षरी परा ।
ॐ ह्लीं ॐ मे ललाटे च बगला वैरिनाशिनी ॥१॥
गदाहस्ता सदा पातु मुखं मे मोक्षदायिनी ॥
वैरिजिह्वाधरा पातु कण्ठं मे बगलामुखी ॥२॥

उदरं नाभिदेशं च पातु नित्यं परात्परा ॥
परात्परतरा पातु मम गुह्यं सुरेश्वरी ॥३॥
हस्तौ चैव तथा पादौ पार्वती परिपातु मे ॥
विवादे विषमे घोरे संग्रामे रिपुसंकटे ॥४॥
पीताम्बरधरा पातु सर्वाङ्गं शिवनर्तकी ॥
श्रीविद्या समयं पातु मातङ्गी पूरिता शिवा ॥५॥
पातु पुत्रं सुतांश्चैव कलत्रं कालिका मम ॥
पातु नित्यं भ्रातरं मे पितरं शूलिनी सदा ॥६॥
रन्ध्रेहि बगलादेव्याः कवचं मन्मुखोदितम् ॥
न वै देयममुख्याय सर्वसिद्धिप्रदायकम् ॥७॥
पठनाद्धारणादस्य पूजनाद्वाञ्छितं लभेत् ॥
इदं कवचमज्ञात्वा यो जपेद् बगलामुखीम् ॥८॥
पिबन्ति शोणितं तस्य योगिन्यः प्राप्य सादराः ॥
वश्ये चाकर्षणे चैव मारणे मोहने तथा ॥९॥
महाभये विपत्तौ च पठेद्वा पाठयेत्तु यः ॥
तस्य सर्वार्थसिद्धिः स्याद्भक्ति युक्तस्य पार्वति ॥ १० ॥

इति श्रीरुद्रयामले बगलामुखी कवचं सम्पूर्णम् ॥

श्री बगलामुखी स्तोत्रम्

श्रीगणेशाय नमः ॥ श्रीबगलामुखीदेव्यै नमः ॥

ॐ अस्य श्रीबगलामुखीस्तोत्रस्य भगवान् नारद ऋषिः । बगलामुखी देवता । मम सन्निहितानां दुष्टानां विरोधिनां वाङ्मुखपदजिह्वाबुद्धीनां स्तम्भनार्थे श्रीबगलामुखी वरप्रसादसिद्ध्यर्थे जपे विनियोगः ॥ करन्यास- ॐ ह्लीं-अङ्गुष्ठाभ्यां नमः । ॐ बगलामुखी- तर्जनीभ्यां स्वाहा ॥ ॐ सर्वदुष्टानां- मध्यमाभ्यां वषट् ॥ ॐ वाचं मुखं पदं स्तम्भय- अनामिकाभ्यां हुम् ॥ ॐ जिह्वां कीलय- कनिष्ठिकाभ्यां वौषट् ॥ ॐ बुद्धिं नाशय ॐ ह्लीं स्वाहा- करतलकरपृष्ठाभ्यांफट् ॥ एवं हृदयादि न्यास- ॐ ह्लीं - हृनयाय नमः । ॐ बगलामुखी- शिरसे स्वाहा । ॐ सर्वदुष्टानां- शिखायै वखट् । ॐ वाचं मुखं पदं स्तम्भय- कवचाय हुम् । ॐ जिह्वां कीलय नेत्रत्रयाय वौषट् । ॐ बुद्धिं नाशय ॐ ह्लीं स्वाहा- अस्त्राय फट् ॥

अथ ध्यानम्

ॐ सौवर्णासनसंस्थितां त्रिनयनां पीतांसुकोल्लासिनीं ।
हेमाभाङ्गरुचिं शशाङ्कमुकुटां स्रक्चम्पकस्रग्युताम्
हस्तैर्मुद्गरपाशबद्धरसनां संबिभ्रतिं भूषणै-
र्व्याप्तांगीं बगलामुखीं त्रिजगतां संस्तम्भिनीं चिन्तये ॥

अथ स्तोत्रम्

ॐ मध्ये सुधाबिधमणिमण्डपरत्नवेद्यां,
सिंहासनो परिगतां परिपीतवर्णाम्।
पीताम्बराभरणमाल्य विभूषिताङ्गीं,
देवीं भजामि धृतमुद्गरवैरिजिह्वाम्॥ १ ॥
जिह्वाग्रमादाय करेण देवीं वामेन शत्रुं परिपीडयन्तीम्॥
गदाभिघातेन च दक्षिणेन पीताम्बराख्यां द्विभुजां भजामि ॥२॥
ॐचलत्कनक कुण्डलोल्लसितचारुगंडस्थलीं
लसत्कनकचम्पकद्युतिमदिन्दु बिम्बाननाम्॥
गदाहतविपक्षिकां कलितलोल जिह्वाञ्चलां
स्मराभि बगलामुखीं विमुखवाङ् मनस्तम्भिनीम्॥३॥
पीयूषोदधि मध्यचारुविलसद्रक्तोत्पले मण्डपे।
तत्सिहासनमौलिपातितरिपुं प्रेतासनाध्यासिनीम्॥
स्वर्णाभांकरपीडितारिरसनां भ्राम्यद्गदां विभ्रती।
मित्थं ध्यायति यान्ति तस्य विलयं सद्योऽथ सर्वापदः ॥४॥
देवि त्वच्चरणाम्बुजार्चनकृते यः पीतपुष्पाञ्जलिम्
भक्त्या वामकरे निधाय च पुनर्मन्त्रं मनोज्ञाक्षरम्॥

पीठध्यानपरोऽथ कुम्भकवशाद् बीजं स्मरेत्पार्थिवः।
तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत्तत्क्षणात्॥५॥
वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति।
क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खञ्जति॥
गर्वी खर्वति सर्वविच्च जडति त्वद्यन्त्रणायन्त्रितः।
श्रीनित्ये बगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः॥६॥
मन्त्रस्यात्मवलं विपक्षदलने स्तोत्रं पवित्रं च ते
यन्त्रं वादिनियन्त्रणं त्रिजगतां जैत्रञ्च चित्रञ्च ते॥
मातः श्रीबगलेति नाम ललितं यस्याऽस्ति जन्तोर्मुखे।
त्वन्नामग्रहणेन संसदि मुखस्तम्भो भवेद्वादिनाम्॥७॥
दुष्टस्तम्भनमुग्रविध्न शमनं दारिद्र्यविद्रावणं
भूभृद्भीशमनं चलन्मृगदृशां चेतःसमाकर्षणम्॥
सौभाग्यैकनिकेतनं यमदृशः कारुण्यपूर्णामृतम्।
मृत्योर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः॥८॥
मातर्भञ्जय मे विपक्षवदनं जिह्वां च सङ्कीलय।
ब्राह्मीं मुद्रय मुदयाशु धिषणामुग्रां गतिं स्तम्भय॥

शत्रूँश्चूर्णय देवी तीक्ष्णगदया गौराङ्गि पीताम्बरे।
विघ्नौघं बगले हर प्रणमतां कारुण्यपूर्णेक्षणे ॥९॥
मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये।
श्रीविद्ये समये महेशि बगले कामाक्षि वामे रमे ॥
मातङ्गि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे ॥
दासोऽहं शरणागतः करुणया विश्वेश्वरि त्राहि माम् ॥१०॥
संरम्भे चौरसंघे प्रहरणसमये बन्धने वारिमध्ये।
विद्यावादे विवादे प्रकुपितनृपतौ दिव्यकाले निशायाम्
वश्यत्वे स्तम्भने वा रिपुवधसमये दुर्विवादे रणे वा।
गच्छँस्तिष्ठँस्त्रिकालं यदि पठति शिवं प्राप्नुयादाशु धीरः ॥११॥
नित्यं स्तोत्रमिदं पवित्रमिह यो देव्याः पठत्यादराद्।
धृत्वायं इदं तथैव समरे बाहौकरे वा गले
राजानोऽप्यरयो मदान्धकरिणः सर्पा मृगेन्द्रादिका
स्ते वै यान्ति विमोहिता रिपुगणा लक्ष्मीः स्थिरा सर्वतः ॥१२॥
त्वं विद्या परमा त्रिलोकजननी विघ्नौघसंछेदिनी।
योषाकर्षणकारिणी त्रिजगतामानन्दसंवर्द्धिनी ॥

दुष्टोच्चाटनकारिणी जनमनः सम्मोहसंदायिनी ।
जिह्वां कीलय भैरवी विजयते ब्रह्मास्त्र विद्या परा ॥१३॥
विद्या लक्ष्मीः सर्वसौभाग्यमायुः
पुत्रैः पौत्रैः सर्वसाम्राज्यसिद्धिः ।
मानंभोगो वश्यमारोग्यसौख्यं
प्राप्तें तत्तद्भूतलेऽस्मिन्नरेण ॥१४॥
यत्कृतं जप सन्ना हं गदितं परमेश्वरि ।
दुष्टानां निग्रहार्थाय तद्गृहाण नमोऽस्तुते ॥१५॥
ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु विश्रुतम्
गुरुभक्ताय दातव्यं न देयं यस्य कस्यचित् ॥१६॥
पीताम्बराञ्च द्विभुजां त्रिनेत्रां गात्रकोज्वलाम्
शिलामुद्गरहस्तां च स्मरेत्तां बगलामुखीम् ॥ १७ ॥

ॐ तत्सत श्री रुद्रयामले श्रीबगलामुखीस्तोत्रं सम्पूर्णम्

अथ मन्त्र–

ॐ ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय कीलयः बुद्धिं नाशय ह्लीं ॐ स्वाहा ॥

मृत्युञ्जयस्तोत्रम्

श्री गणेशाय नमः । ॐ नमो मृत्युञ्जयाय

नन्दिकेश्वर उवाच–

कैलाशस्योत्तरे शृङ्गे शुद्धस्फटिकसन्निभे ।
तमोगुणविहीने तु जरामृत्युविवर्जिते ॥१॥
सर्वार्थसम्पदाधारे सर्वज्ञानकृतालये ।
कृताञ्जलिपुटो ब्रह्मा ध्यानासीनं सदाशिवम् ॥२॥
पप्रच्छ प्रणतो भूत्वा जानुभ्यामवनिं गतः ।
सर्वार्थसम्पदाधार ब्रह्मा लोकपितामहः॥३॥

ब्रह्मोवाच–

केनोपायेन देवेश चिरायुर्लोमशोऽभवत् ।
तन्मे ब्रुहि महेशान लोकानां हितकाम्यया ॥४॥

श्री सदाशिव उवाच–

शृणु ब्रह्मन् प्रवक्ष्यामि चिरायुर्मुनिसत्तमः ।
सञ्जातः कर्मणा येन व्याधिमृत्युविवर्जितः ॥५॥

तस्मिन्नेकार्णवे घोरे सलिलौघपरिप्लुते।
कृतान्तभयनाशाय स्तुतो मृत्युञ्जयः शिवः ॥६॥
तस्य सङ्कीर्तनान्नित्यं मुनिर्मृत्युविवर्जितः।
तमेव कीर्तयन् ब्रह्मन् मृत्युञ्जेतुं न संसयः ॥७॥

लोमश उवाच–

ॐ देवाधिदेवदेवेश सर्वप्राणभृताम्बर।
प्राणिनामपि नाथस्त्वं मृत्युञ्जय नमोऽस्तु ते ॥८॥
देहिनां जीवभूतोऽसि जीवो जीवस्य कारणम्।
जगतां रक्षकस्त्वं वै मृत्युञ्जय नमोऽस्तु ते ॥९॥
हेमाद्रिशिखराकार सुधावीचिमनोहर।
पुण्डरीकपरंज्योति मृत्युञ्जय नमोऽस्तु ते ॥१०॥
ध्यानाधार महाज्ञान सर्वज्ञानैककारण।
परित्राताऽसि लोकानां मृत्युञ्जय नमोऽस्तु ते ॥११॥
निहता येन कालेन सदेवासुरमानुषाः।
गन्धर्वाप्सरसश्चैव सिद्धविद्याधरास्तथा ॥१२॥
साध्याश्च वसवो रुद्रास्तथाऽश्विनीसुतावुभौ।
मरुतश्च दिशो नागाः स्थावरा जङ्गमास्तथा ॥१३॥
जित सोऽपि त्वया ध्यानात् मृत्युञ्जय नमोऽस्तु ते ॥१४॥

ये ध्यायन्ति परां मूर्तिं पूजयन्त्यमरादयः ।
न ते मृत्युवशं यान्ति मृत्युञ्जय ६ नमोऽस्तु ते ॥१५॥
त्वमोङ्कारोऽसि वेदानां देवानां च सदाशिवः ।
आधारशक्तिः शक्तीनां मृत्युञ्जय नमोऽस्तु ते ॥१६॥
स्थावरे जङ्गमे वापि यावत्तिष्ठति देहगः ।
जीवत्यपत्यलोकोऽयं मृत्युञ्जय नमोऽस्तु ते ॥१७॥
सोमसूर्याग्निमध्यस्थ व्योमव्यापिन् सदाशिव ।
कालत्रय महाकाल मृत्युञ्जय नमोऽस्तु ते ॥१८॥
प्रबुद्धे चाप्रबुद्धे च त्वमेव सृजसे जगत् ।
सृष्टिरूपेण देवेश मृत्युञ्जय नमोऽस्तु ते ॥१९॥
व्योम्नि त्वं व्योमरूपोऽसि तेजः सर्वत्र तेजसि ।
ज्ञानिनां ज्ञानरूपोऽसि मृत्युञ्जय नमोऽस्तु ते ॥२०॥
जगज्जीवो जगत्प्राणः स्रष्टा त्वं जगतः प्रभुः ।
कारणं सर्वतीर्थानां मृत्युञ्जय नमोऽस्तु ते ॥२१॥
नेता त्वमिन्द्रियाणां च सर्वज्ञानप्रबोधकः ।
सांख्ययोगश्च हंसश्च मृत्युञ्जय नमोऽस्तु ते ॥२२॥
रूपातीतः सरूपश्च पिण्डस्थपदमेव च ।
चतुर्युगकलाधार मृत्युञ्जय नमोऽस्तु ते ॥२३॥
रेचके वह्निरूपोऽसि सोमरूपोऽसि पूरके ।
कुम्भके शिवरूपोऽसि मृत्युञ्जय नमोऽस्तु ते ॥२४॥

क्षयङ्करोऽसि पापानां मुण्यानामपि वर्द्धनम्।
हेतुस्त्वं श्रेयसां नित्यं मृत्युञ्जय नमोऽस्तु ते ॥२५॥
सर्वमायाकलातीत सर्वेन्द्रिय परावर।
सर्वेन्द्रियकलाधीश मृत्युञ्जय नमोऽस्तु ते ॥२६॥
रूपं गन्धो रसः स्पर्शः शब्दः संस्कार एव च।
त्वत्तः प्रकाश एतेषां मृत्युञ्जय नमोऽस्तु ते ॥२७॥
ततुर्विधानां सृष्टिनां हेतुस्त्वं कारणेश्वर।
भावाभावपरिछिन्न मृत्युञ्जय नमोऽस्तु ते ॥२८॥
त्वमेको निष्कलो लोके सकलम्भुवनत्रये।
अतिसूक्ष्मातिरूपस्त्वं मृत्युञ्जय नमोऽस्तु ते ॥२९॥
त्वं प्रबोधस्त्वमाधार त्वद्बीजं भुवनत्रयम्।
सत्वं रजस्तमस्त्वं हि मृत्युञ्जय नमोऽस्तु ते ॥३०॥
त्वं सोमस्त्वं दिनेशश्च त्वमात्मा प्रकृतेः परः।
अष्टात्रिंशत्कलानाथ मृत्युञ्जय नमोऽस्तु ते ॥३१॥
सर्वेन्द्रियाणामाधारः सर्वभूतगुणाश्रयः।
सर्वज्ञानमयानन्त मृत्युञ्जय नमोऽस्तु ते ॥३२॥
त्वमात्मा सर्वभूतानां गुणानां त्वमधीश्वरः।
सर्वानन्दमयाधार मृत्युञ्जय नमोऽस्तु ते ॥३३॥
त्वं यज्ञः सर्वयज्ञानां त्वं बुद्धिर्बोधलक्षणा।
शब्दब्रह्मस्त्वमोङ्कारो मृत्युञ्जय नमोऽस्तु ते ॥३४॥

श्री सदाशिव उवाच–

एवं सङ्कीर्त्तयेद्यस्तु शुचिस्तद्गतमानसः ।
भक्त्या श्रृणोति यो ब्रह्मन् न स मृत्युवशो भवेत् ॥३५॥
न च मृत्युभयं तस्य प्राप्तकालं च लङ्घयेत् ।
अपमृत्युभयं तस्य प्रणश्यन्ति न संशयः ॥३६॥
व्याधयो नोपपद्यन्ते नोपसर्गभयं भवेत् ।
प्रत्यासन्नान्तरे काले शतैकावर्तने कृते ॥३७॥
मृत्युर्न जायते तस्य रोगान् मुञ्चति निश्चितम् ।
पञ्चम्यां वा दशम्यां वा पौर्णमास्यामथापि वा ॥३८॥
शतमावर्तयेद्यस्तु शतवर्षं स जीवति ।
तेजस्वी बलसम्पन्नो लभते श्रियमुत्तमाम् ॥३९॥
त्रिविधं नाशयत्पापं मनोवाक्–कायसम्भवम् ।
अभिचाराणि कर्माणि कर्माण्याथर्वणानि च ।
क्षीयन्ते नात्र सन्देहो दुःस्वप्नश्च विनश्यति ॥४०॥
इदं रहस्यं परमं देवदेवस्य शूलिनः ।
दुःस्वप्ननाशनं पुण्यं सर्वविघ्नविनाशनम् ॥४१॥

इति श्री शिवब्रह्मसंवादे श्रीमृत्युञ्जयस्तोत्रं सम्पूर्णम् ॥

लेखकको परिचय

नाम: मधुसूदन सुवेदी

जन्म: वि.सं. २००० ललितपुर, सानेपा।

शिक्षा: बि.ए.,बि.लिब. एस्सी एण्ड डिओसी।

सेवा : विभिन्न मन्त्रालय, विभाग, लोक सेवा आयोग, निर्देशक नेपाल राष्ट्रिय पुस्तकालय, संसद सचिवालय, सर्वोच्च अदालत, केन्द्रीय कानून पुस्तकालय आदीमा ५० वर्षको अनुभव।

संघसस्था: सङ्कट कालीन निवारण समिति, विश्व हिन्दू महासंघ, ढुंङ्गेधारा सत्संग भवन संरक्षण समिति, सानेपा, गीता अध्ययन मण्डल स्वयम्भू, ॐ सत्सङ्ग भवन जावलाखेल, आत्मालोक सन्यास आश्रम, वागडोल, सानेपा स्वास्थ्य चौकी, अन्तर्राष्ट्रिय ब्राह्मण संघ, भारद्वाज संस्कृति सम्बर्धन केन्द्र आदि।

कृति: हिन्दू सदाचार पद्धति, पुस्तकालय विज्ञानको उपादेयता, शारदीय दुर्गापूजा विधि, स्व.स.से.ऋषी सुवेदीको सम्झनामा शोक काव्य, सरलीकृत सत्यनारायण पूजा विधि, सरलीकृत लक्ष्मी पूजा विधि, सरलीकृत महालक्ष्मी पूजाबिधि, सरलीकृत अन्त्यपद्धति, सरलीकृत मार्कण्डेयाद्यष्ट चिरंजीवि पूजाविधि, नव ग्रहादि पाठ सहित, **Fundamentals of Library & Information Science on Nepales Response,** हिन्दू विवाहको इतिहास, सनातन हिन्दू धर्म तथा संस्कार, सरलीकृत अग्निस्थापना विधि, सरलीकृत शिलान्यास बिधि, सनातन दैनिक पूजाविधि तथा वार्षिक पर्व निर्देशिका, **Om Age Old Eternal Hindu Religion & Sacrament,** सरलीकृत स्वयम्वर पटलाञ्छन पूर्वाङ्गग्रहशान्ति सहित विवाह विधि, सरलीकृत ग्रहशान्त्यग्निस्थापन चूडोपनयन वेदारम्भ समावर्तन विधि, सरलीकृत हरितालिका र ऋषिपञ्चमी पूजाविधि, सम्पूर्ण एकादशी महात्म्य सरल पूजाविधि सहित, श्री गणेश सहस्रनाम पूजाविधि, सनातन विशेष चाडपर्व तथा धार्मिक लेख,श्रीपशुपतिनाथ र द्वादश ज्योतिर्लिङ्ग, शिवपूजाविधि सहित रूद्राष्ट्याध्यायी, तीर्थयात्रा संस्मरण, सरलीकृत पूर्णिमाव्रत चन्द्रमापूजाविधि, सरलीकृत मासिक श्राद्ध पद्धति, **History of the Aryan Marriage a Sacrament,** श्री स्वस्थानी व्रतकथा, सरल पूजाविधि सहित।

भ्रमण: भारत, श्रीलंका, थाईलैण्ड, हङ्कंकङ्ग, चीन।